# B.B.R.A. SOCIETY'S PUBLICATIONS FOR SALE.

## JOURNALS.

| Volumes. | Nos. | Year. | | Price. Rs. a. p. |
|---|---|---|---|---|
| I and II | 1–11 | 1841–47 | each number .. .. | 3 0 0 |
| III and IV | 12–17 | 1847–52 | " .. .. | 4 0 0 |
| V to XIX | 18–53 | 1853–97 | " .. .. | 5 0 0 |
| XX to XXI | 54–59 | 1897–03 | " .. .. | 5 0 0 |
| XXII | 60–62 | 1904–07 | " .. .. | 4 0 0 |
| XXIII | 63–67 | 1908–13 | " .. .. | 3 0 0 |
| XXIV | 68–70 | 1914–17 | " .. .. | 4 0 0 |
| XXV to XXVI | 71–75 | 1917–23 | " .. .. | 5 0 0 |

(Nos. 9, 11, 13, 17–23, 31-32, 34–43, 47–51, 56, 58, 59 and 73 out of stock.)

## NEW SERIES.

| Volumes. | Nos. | Year. | | Price |
|---|---|---|---|---|
| I | 1 & 2 | 1925 | .. .. .. .. .. | 12 8 0 |
| II | " | 1926 | .. .. .. .. .. | 10 0 0 |
| III | " | 1927 | .. .. .. .. .. | 15 0 0 |
| IV | " | 1928 | .. .. .. .. .. | 10 0 0 |
| V | " | 1929 | .. .. .. .. .. | 7 8 0 |
| VI | " | 1930 | .. .. .. .. .. | 15 0 0 |
| VII-VIII | " | 1931-32 | .. .. .. each | 7 8 0 |
| IX-X-XI | " | 1933-34-35 | .. .. .. " | 10 0 0 |
| XII | | 1936 | .. .. .. .. .. | 15 0 0 |
| XIII | | 1937 | .. .. .. .. .. | 7 8 0 |
| XIV | | 1938 | .. .. .. .. .. | 10 0 0 |
| XV | | 1939 | .. .. .. .. .. | 7 8 0 |
| XVI | | 1940 | .. .. .. .. .. | 10 0 0 |
| XVII | | 1941 | .. .. .. .. .. | 7 8 0 |
| XVIII | | 1942 | .. .. .. .. .. | 10 0 0 |
| XIX | | 1943 | .. .. .. .. .. | 12 8 0 |
| XX | | 1944 | .. .. .. .. .. | 15 0 0 |
| XXI | | 1945 | .. .. .. .. .. | 7 8 0 |
| XXII | | 1946 | .. .. .. .. .. | 12 8 0 |

## EXTRA NUMBERS AND MONOGRAPHS.

| | | |
|---|---|---|
| *No. 34A | Dr. Buhler's Report on Sanskrit MSS. Kashmir (1877) .. .. | 5 0 0 |
| 41 | Dr. Peterson's Report on Sanskrit MSS. (1882-83) .. .. .. | 5 0 0 |
| *" 44 | Do. do. (1883-84) .. .. .. | 5 0 0 |
| *" 45 | Do. do. (1884–86) .. .. .. | 5 0 0 |
| *" 49A | Do. do. (1886–92) .. .. .. | 5 0 0 |
| | *Origin of Bombay. By Dr. J. Gerson da Cunha, 1900 .. .. .. .. | 10 0 0 |
| | *Centenary Memorial Volume, 1905 .. .. .. .. .. .. .. | 10 0 0 |
| | No. 75A Indian and Foreign Chronology. By B. V. Ketkar .. .. .. | 5 0 0 |
| | *Index to the Transactions of the Literary Society, Bombay, Vols. I—III, and to the Journals of the B.B.R.A. Society, Vols. I—XVII, with a Historical Sketch of the Society. By Ganpatrao K. Tiwarekar, Librarian .. | 4 0 0 |
| | Folklore Notes compiled and edited by R. E. Enthoven, C.I.E., I.C.S., from materials collected by the late Mr. A. M. T. Jackson, I.C.S., 2 vols. (Vol. I—Gujarat, Vol. II—Konkan). Each volume .. .. .. .. | 3 0 0 |
| | Buddhaghosa. By Dr. B. C. Law, M.A., B.L., Ph.D., D.Litt. (B.B.R.A. Society Monograph No. 1) .. .. .. .. .. .. .. .. .. .. | 6 0 0 |

*Out of Stock.

## CATALOGUE OF THE LIBRARY.

| | |
|---|---|
| Complete Catalogue of the Library— | |
| Part I—Authors, up to the end of 1915 .. .. .. .. .. .. | 7 0 0 |
| Part II—Subjects, up to the end of 1917 .. .. .. .. .. .. | 9 0 0 |
| Two volumes in one order .. .. .. .. .. .. | 14 0 0 |
| Yearly Catalogues of the Library of the B.B.R.A. Society (1922 to 44), each | 0 8 0 |
| Descriptive Catalogue of Sanskrit and Prakrit Manuscripts in the Library of the Society. Compiled by Prof. H. D. Velankar, M.A. Vol. I—Scientific Literature .. .. .. .. .. .. .. .. .. .. .. | 5 0 0 |
| Vol. II: Hindu Literature .. .. .. .. .. .. .. .. .. | 8 0 0 |
| Vols. III-IV: Jain and Vernacular Literature .. .. .. .. .. | 4 0 0 |
| Descriptive list of Arabic, Persian and Urdu Manuscripts in the Library of the Society .. .. .. .. .. .. .. .. .. .. .. .. | 1 8 0 |

## BOMBAY GEOGRAPHICAL SOCIETY.

| | |
|---|---|
| Proceedings, Bombay Geographical Society, 1837 & 1839 .. .. .. each | 0 8 0 |
| Do. do. 1838 & 1840 .. .. .. " | 1 0 0 |
| Transactions, Vols. VI–X, 1841–1852 .. .. .. .. each year | 1 8 0 |
| Do. do. XI–XIX, 1852–1873 .. .. .. .. .. " | 2 0 0 |
| Index to the Transactions of the Bombay Geographical Society, Vols. I to XVII, with Catalogue of the Library. By D. J. Kennelly, Hon. Secretary | 5 0 0 |

*N.B.*—This price list cancels all previous lists.

Vol. 23 1947

LIBRARY
JUN 8 1950
UNIVERSITY OF CALIFORNIA

# JOURNAL
OF THE
# BOMBAY BRANCH
OF THE
# ROYAL ASIATIC SOCIETY

(New Series)

EDITED BY
P. V. KANE
A. A. A. FYZEE
N. K. BHAGWAT

CONTENTS

H. D. Velankar: Prākṛta and Apabhraṁśa Metres .. .. 1
V. V. Gokhale: An Emendation in the Text of the *Abhidharmakośakārikā* 12
V. V. Gokhale: Fragments from the Abhidharmasamuccaya of Asaṃga .. 13
D. D. Kosambi: Early Brahmins and Brahminism .. .. .. 39
B. M. Barua and P. B. Chakravarti: The Saugor Plate of Trailōkya Varman 47
A. S. Bhandarkar: The origin of the Pathare or Patane Prabhus .. 53
G. V. Devasthali: Alaṁkāra-Tilaka of Bhānudatta.. .. .. 57
Md. Shafi: Note on the Arabic word " Warashān " .. .. .. 87
Reviews of Books: *Some Problems of Historical Linguistics in Indo-Aryan* (P.V.K.); *Compromises in the History of Advaitic Thought* (P.V.K.); *The Autobiography and Biography of Dadoba Pandurang* (P.V.K.); *A Handbook of Diplomatic and Political Arabic* (A.A.A.F.); *The Magadhas in Ancient India* (A.D.P.); *The Mudrārākṣasanāṭakakathā of Mahādeva* (A.D.P.) .. .. .. .. 93
Books Received .. .. .. .. .. 97

Published by the Society
1949

London Agent:
ARTHUR PROBSTHAIN
41, Great Russell Street, London, W.C. 1

## AN EMENDATION IN THE TEXT OF THE *ABHIDHARMAKOŚAKĀRIKĀ*, IV, 74. (Published in this Journal, N.S. Vol. 22 (1946) p. 88, l. 9.)

By V. V. Gokhale

This kārikā appears on folio 22*b*, which as has been pointed out in the Introduction on p. 74 (*ibid.*) is one of the pages of the MS. on which the writing has become very faint and illegible. The beginning of the kārikā, viz. *anyasaṃjñoditaṃ vākyam* had therefore to be determined on the basis of L.V.P.'s reconstruction of the text, which has generally proved an efficient guide on similar occasions.

My learned friend, Muni Jambūvijaya, however, has kindly suggested in his letter (from Talegaon-Dhamdhere, dated 16-8-1948) a correction of this phrase on the basis of a quotation of the first-half of the kārikā by Siddhasena in his commentary called *Tattvārthaśāstraṭīkā* on Umāsvāti's *Tattvārthādhīgamasūtra*, VII, 9, which reads: अपरे तु मोहादयुक्तं मृषालक्षणं ब्रुवते । अन्यथासंज्ञिनो वाक्यमर्थाभिज्ञे मृषावचः । यद्वचनं यमर्थं ब्रवीति तस्मिन्नन्यथासंज्ञी भवति चौरमचौरमिति, यं वाऽधिकृत्य ब्रवीति स तस्य वाक्यस्याऽर्थाभिज्ञो यदि भवति ततस्तद्वाक्यं मृषावादः etc. ।। (ed. by H. R. Kapadia, Surat, 1930, Sheth Devachand Lalbhai Jain Pustakoddhār Fund Series, No. 76, Part II, p. 75, ll. 15ff.).

I think, this settles the point satisfactorily and it would be proper to adopt the reading, viz. *anyathāsaṃjñino* (instead of *anyasaṃjñoditam*), which besides allowing itself to be read as such into the faint photographic marks indicating the text of the MS. expresses the sense of the original in a correct form.

I am greatly indebted to the Muniji for having suggested this emendation.

## FRAGMENTS FROM THE ABHIDHARMASAMUCCAYA OF ASAṂGA

By V. V. Gokhale

In an article entitled *A rare manuscript of Asaṃga's Abhidharmasamuccaya*, submitted to the Harvard Journal of Asiatic Studies, I have described in brief the significance and the nature of the incomplete palm leaf manuscript, discovered by Rāhula Sāṃkṛtyāyana in the Tibetan monastery of 'Ṣa. lu near Si. ga. rtse'. The following eight fragments (A to H) found therein comprise nearly two-fifths of the full text of the *Abhidharmasamuccaya* of Ācārya Asaṃga, with whose advent the Buddhist philosophical thought appears to be entering into a compromise with the methods of mysticism, although its constructions are still based upon a deep and penetrating analysis of all mental phenomena and an enormous amount of such scriptural learning as is set forth, e.g. in the *Abhidharmakośa*, composed by his younger brother Vasubandhu.

For preparing the critical edition of these fragments the following sources, known so far, have been utilized:—

(1) Photographs of seventeen palm leaves, containing the Saṃskṛta fragments of the *Abhidharmasamuccaya*, written in a script belonging, on palaeographical evidence, to the first half of the eleventh century A.D. See the list of MSS. published by Rāhula Sāṃkṛtyāyana in *JBORS.*, Vol. XXXIII, pt. i, p. 48, title No. 312.

(2) Tibetan translation by Jinamitra, Śīlendrabodhi, etc. of the full text of the *Abhidharmasamuccaya*, found in Mdo LVI, foll. $47a^{6}$–$129b^{5}$ of the Narthang edition of the Tibetan Tanjur, belonging to the Adyar Library.

(3) Chinese translation by Hsüan Chuang of the full text of the *Abhidharmasamuccaya* (which, by the way, is slightly inflated as compared to Nos. 1-2 above), printed in Vol. XXXI, No. 1605, Pp. $663a^{1}$–$694b^{10}$ of the Taisho edition of the Chinese Buddhist Canon, belonging to the Bombay University Library.

(4) Photographs of a complete Saṃskṛta MS. of the *Abhidharmasamuccayabhāṣya*, containing 149 folios, written in a script belonging approximately to the thirteenth century A.D. by the scribe Panditavaidya-śrī-Amaracandra. See *JBORS.*, Vol. XXI, pt. i, p. 35, title No. 86 in the list of MSS. discovered in the Tibetan monastery of Ngor by Rāhula Sāṃkṛtyāyana.

(5) Tibetan translation by Jinamitra, Śīlendrabodhi, etc., of No. 4 above, attributed here to Jinaputra (= Rājaputra Yaśomitra ?), found in Mdo LVII, foll. 1a–135a of the Narthang Tanjur from Adyar.

(6) Chinese translation by Hsüan Chuang of the *Abhidharmasamuccayavyākhyā* of Sthiramati, printed in Vol. XXXI, No. 1606, Pp. 694b–774a of the Taisho edition from Bombay. The authorship of Sthiramati is of late authenticity. See No. 7 below.

(7) Tibetan translation by Jinamitra, later revised by the Tibetan Sanskritist Sūryadhvajaśrībhadra, of the *Abhidharmasamuccayavyākhyā*, found in Mdo LVII, foll. 135a–349a of the Narthang Tanjur from Adyar. This is attributed again to Jinaputra (= Yaśomitra ?), although it corresponds with No. 6 above, which is attributed to Sthiramati by the Chinese and which, unlike Yaśomitra's *Sphuṭārthā Abhidharmakośavyākhyā*, follows the method of quoting the basic text in full before commenting upon it.

Both the Tibetan and the Chinese translations of the *Abhidharmasamuccaya* (Nos. 2 and 3 above) proved to be of great use not only in fixing the interpunctuation

and understanding the exact meanings of technical terms, but also in gaining a general view of the complete original work, which has its own scheme for dividing the subject into parts and sections. In the following summary the eight fragments falling within the different sections are represented by the letters A to H in curved brackets, the minus sign being used to indicate the incompleteness of the passage on either side:

Abhidharmasamuccaya

- I. Lakṣaṇasamuccaya (foll. 1–16b)
  - (i) (Dharmatraya = Skandhadhātvāyatanāni)
    1. kati
    2. kimupādāya
    3. Lakṣaṇa
    4. Vyavasthāna (—A—)
    5. Anukrama
    6. Artha
    7. Dṛṣṭānta
    8. Prabheda (—B—)
  - (ii) Saṃgraha
  - (iii) Saṃprayoga (—C)
  - (iv) Samanvāgama (C)
- II. Viniścayasamuccaya (foll. 16b–45)
  - (i) Satyaviniścaya
    1. Duḥkhasatya (C—, —D)
    2. Samudayasatya (D—)
    3. Nirodhasatya
    4. Mārgasatya (—E—)
  - (ii) Dharmaviniścaya (—F)
  - (iii) Prāptiviniścaya (—G—, —H—)
  - (iv) Sāṃkathyaviniścaya

On the basis of a thorough comparative study of the above-mentioned material it should be possible to restore the missing portions, which constitute nearly 60% of the original Saṃskṛta text of the *Abhidharmasamuccaya*, particularly with the help of the Saṃskṛta commentary (No. 4 above), which explains and discusses many of the important technical terms relating to the Buddhist Yogaśāstra. I hope to be able to publish this Saṃskṛta commentary and a reconstruction of the lost portions of the *Abhidharmasamuccaya* at a later date, if circumstances permit. In the meanwhile, the fragments published here need not be withheld from scholars, who will find them of sufficient interest and usefulness in understanding in greater detail the philosophical speculations current in the Gupta age; see e.g. the theory of The Five Skandhas and the Ālayavijñāna (foll. 3a-5b) in Fragment A, and that of the Pratītyasamutpāda (fol. 12b) in Fragment B, (explained in special treatises by Vasubandhu in his Pañcaskandhaka, Triṃśikā and Pratītyasamutpādādivibhaṅganirdeśa, etc.), the description of the states of life after death (fol. 19a-b) in Fragment D (which may be compared with Bhagavadgīta VIII, 23–26), the paths of salvation (comparable with those of the Pātañjala Yoga) in Fragment E, the superiority of the Mahāyāna doctrine as detailed in the Vaipulya texts, in Fragment F.

Asaṃga's thought being deeply rooted in the pre-Mādhyamika Buddhist traditions of learning, the language of his work retains a number of canonical archaisms both in respect of grammar and style: e.g. tyājana, lajjanā, paripūri, yadbhūyasā, apratisaṃkhyāya, paramapārāmiṃ prāptāḥ, naivaśaikṣāṇāśaikṣāṇi, adhyātmaṃkāyaḥ, srotaāpannaḥ, kati duḥkhaduḥkhatāni, no tu Bodhisattvaḥ, etc.; the system of orthography has therefore not been kept quite rigid. The single *avagraha* sign has been used only for the initial *a* of an uncompounded word. A few additions have been made to the Saṃskṛta text of the MS. on the basis of the Chinese and Tibetan sources; these have been enclosed into square brackets along with a few minor corrections and omissions in the MS., restored on their strength. The lacunae in the full original text of the *Abhidharmasamuccaya* have been noted at the beginning or end of each Fragment in terms of the written or unwritten folio numbers in the Saṃskṛta MS.(-Skt.), the corresponding portion of the Tibetan translation (No. 2 above, from the Narthang edition= Tib.), and that of the Chinese translation (No. 3 above, from the Taisho edition= Ch.), which last divides each page into three horizontal sections, here noted as *a*, *b*, *c*. The number of lines have been shown on the top of the number of the Tibetan folio or the Chinese page.



These fragments were first copied out in the winter of 1945-46, when I had the pleasure of having frequent consultations on the Chinese sources with my friend Prof. Kin Kemo, who was then living in Poona for deepening his knowledge of Saṃskṛta philosophical literature. I am glad to acknowledge the financial assistance and the Library facilities offered by the University of Bombay for enabling me to undertake the present investigation. My thanks are due to Mr. Y. A. Godbole, I.C.S., Dr. P. M. Joshi and Prof. H. D. Velankar for their willingness to promote this endeavour. To my friend Prof. D. D. Kosambi I owe all the encouragement I needed for steering ahead under unfair weather.

## Abhidharmasamuccaya

(*Lacuna :* Skt. 1-2 ; Tib. $47a^{6}$–$50b^{7}$ ; Ch. $663a^{1}$–$664a^{3}$)

### A

[संज्ञास्कन्धव्यवस्थानं कतमत् । षट् संज्ञाकायाः । चक्षुःसंस्पर्शजा संज्ञा श्रोत्रघ्राण- ] (fol. 3a) जिह्वाकायमनःसंस्पर्शजा संज्ञा । यया सनिमित्तमपि संजानाति, अनिमित्तमपि, परीत्तमपि, महद्गतमपि, अप्रमाणमपि, नास्ति किञ्चिदित्याकिञ्चन्यायतनमपि संजानाति ॥ सनिमित्तसंज्ञा कतमा । अव्यवहारकुशलस्याऽनिमित्तधातुसमापन्नस्य भवाग्रसमापन्नस्य च संज्ञां स्थापयित्वा यावदन्या संज्ञा ॥ अनिमित्तसंज्ञा कतमा । या स्थापिता संज्ञा ॥ परीत्ता संज्ञा कतमा । यया कामधातुं संजानाति ॥ महद्गता संज्ञा कतमा । यया रूपधातुं संजानाति ॥ अप्रमाणसंज्ञा कतमा । यया आकाशानन्त्यायतनं विज्ञानानन्त्यायतनं च संजानाति ॥ अकिञ्चनंसंज्ञा कतमा । यया आकिञ्चन्यायतनं संजानाति ॥

संस्कारस्कन्धव्यवस्थानं कतमत् । षट् चेतनाकायाः । चक्षुःसंस्पर्शजा चेतना, श्रोत्रघ्राणजिह्वाकायमनःसंस्पर्शजा चेतना । यया कुशलत्वाय चेतयते, संक्लेशाय चेंतयते, अवस्थाभेदाय चेतयते । इतीयं चेतना वेदनां संज्ञां च स्थापयित्वा तदन्ये चैतसिका धर्माश्चित्तविप्रयुक्ताश्च संस्काराः संस्कारस्कन्ध इत्युच्यते ॥ ते पुनः कतमे । मनस्कारः स्पर्शः छन्दोऽधिमोक्षः स्मृतिः समाधिः प्रज्ञा श्रद्धा ह्रीरपत्राप्यमलोभोऽद्वेषोऽमोहो वीर्यं प्रश्रब्धिरप्रमाद उपेक्षाऽविहिंसा रागः प्रतिघो मानोऽविद्या विचिकित्सा सत्कायदृष्टिरन्तग्राहदृष्टिर्दृष्टिपरामर्शः शीलव्रतपरामर्शो मिथ्यादृष्टिः क्रोध उपनाहो म्रक्षः प्रदाश ईर्ष्या मात्सर्यं माया शाठ्यं मदो विहिंसा आह्रीक्यमनपत्राप्यं स्त्यानमौद्धत्यमाश्रद्ध्यं कौसीद्यं प्रमादो मुषितस्मृतिताऽसंप्रजन्यं विक्षेपो मिद्धं कौकृत्यं वितर्को विचारश्च ॥

चेतना कतमा । चित्ताभिसंस्कारो मनस्कर्म । कुशलाकुशलाव्याकृतेषु चित्तप्रेरणकर्मिका ॥ मनस्कारः कतमः । चेतस आभोगः । आलम्बने चित्तधारणकर्मकः ॥ स्पर्शः कतमः । त्रिक-

सन्निपात इन्द्रियविकारपरिच्छेदः । वेदनासन्निश्रयदानकर्मकः ॥ छन्दः कतमः । ईप्सिते वस्तुनि तत्तदुपसंहता कर्तुकामता । वीर्या[ रम्भ ]सन्निश्रयदानकर्मकः ॥ अधिमोक्षः कतमः । निश्चिते वस्तुनि यथानिश्चयं धारणा । असंहार्यताकर्मकः ॥ स्मृतिः कतमा । संस्तुते वस्तुनि चेतसोऽसंप्रमोषः । अविक्षेपकर्मिका ॥ समाधिः कतमः । उपपरीक्ष्ये वस्तुनि चित्तस्यैकाग्रता । ज्ञानसन्निश्रयदानकर्मकः ॥ प्रज्ञा कतमा । उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः संशयव्यावर्तनकर्मिका ॥

श्रद्धा कतमा । अस्तित्वगुणवत्त्वशक्यत्वेष्वभिसंप्रत्ययः (fol. 3b) प्रसादोऽभिलाषः । छन्दसन्निश्रयदानकर्मिका ॥ ह्रीः कतमा । स्वयमवद्येन लज्जना । दुश्चरितसंयमसन्निश्रयदानकर्मिका ॥ अपत्राप्यं कतमत् । परतोऽवद्येन लज्जना । तत्कर्मकमेव ॥ अलोभः कतमः । भवे भवोपकरणेषु वाऽनासक्तिः । दुश्चरिताप्रवृत्तिसन्निश्रयदानकर्मकः ॥ · अद्वेषः कतमः । सत्त्वेषु दुःखे दुःखस्थानीयेषु च धर्मेष्वनाघातः । दुश्चरिताप्रवृत्तिसन्निश्रयदानकर्मकः ॥ अमोहः कतमः । विपाकतो वा आगमतो वाऽधिगमतो वा ज्ञानं प्रतिसंख्या । दुश्चरिताप्रवृत्तिसन्निश्रयदानकर्मकः ॥ वीर्यं कतमत् । कुशले चेतसोऽभ्युत्साहः सन्नाहे वा प्रयोगे वाऽलीनत्वे वाऽव्यावृत्तौ वाऽसंतुष्टौ वा । कुशलपक्षपरिपूरणपरिनिष्पादनकर्मकः ॥ प्रश्रब्धिः कतमा । कायचित्तदौष्ठुल्यानां प्रतिप्रश्रब्धेः कायचित्तकर्मण्यता । सर्वावरणनिष्कर्षणकर्मिका ॥ अप्रमादः कतमः । सवीर्यकानलोभाद्वेषामोहान्निश्रित्य या कुशलानां धर्माणां भावना सास्रवेभ्यश्च धर्मेभ्यश्चित्ताऽऽरक्षा । स च लौकिकलोकोत्तरसंपत्तिपरिपूरणनिष्पादनकर्मकः ॥ उपेक्षा कतमा । सवीर्यकानलोभाद्वेषामोहान्निश्रित्य या संक्लिष्टविहारवैरोधिकी चित्तसमता चित्तप्रशठता चित्तस्यानाभोगावस्थितता । संक्लेशानवकाशसन्निश्रयदानकर्मिका ॥ अविहिंसा कतमा । अद्वेषैकांशिका करुणता । अविहेठनकर्मिका ॥

रागः कतमः । त्रैधातुकोऽनुनयः । दुःखसंजवनकर्मकः ॥ प्रतिघः कतमः । सत्त्वेषु दुःखे दुःखस्थानीयेषु च धर्मेष्वाघातः । अस्पर्शविहारदुश्चरितसन्निश्रयदानकर्मकः ॥ मानः कतमः । सत्कायदृष्टिसन्निश्रयेण चित्तस्योन्नतिः । अगौरवदुःखोत्पत्तिसन्निश्रयदानकर्मकः ॥ अविद्या कतमा । त्रैधातुकमज्ञानम् । धर्मेषु मिथ्यानिश्चयविचिकित्सासंक्लेशोत्पत्तिसन्निश्रयदानकर्मिका ॥ विचिकित्सा कतमा । सत्येषु विमतिः । कुशलपक्षाप्रवृत्तिसन्निश्रयदानकर्मिका ॥ सत्कायदृष्टिः कतमा । पञ्चोपादानस्कन्धानात्मत आत्मीयतो वा समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । सर्वदृष्टिगतसन्निश्रयदानकर्मिका ॥ अन्तग्राहदृष्टिः कतमा । पञ्चोपादानस्कन्धान् शाश्व[ त ]तो वा उच्छेदतो वा समनुपश्यतः या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । मध्यमाप्रतिपन्निर्याणपरिपन्थकर्मिका ॥ दृष्टिपरामर्शः कतमः । दृष्टिं दृष्टचाश्रयांश्च पञ्चोपादानस्कन्धानग्रतः श्रेष्ठतो विशिष्टतः परमतश्च समनुपश्यतो या क्षान्ती रु-(fol. 4a) चिर्मतिः प्रेक्षा दृष्टिः । असद्दृष्टचभिनिवेशसन्निश्रयदानकर्मकः ॥ शीलव्रतपरामर्शः कतमः । शीलं व्रतं शीलव्रता[ श्रयां ]श्च पञ्चोपादानस्कन्धान् शुद्धितो युक्तितो नैर्याणिकतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । श्रमवैफल्यसन्निश्रयदानकर्मकः ॥ मिथ्यादृष्टिः कतमा । हेतुं वाऽपवदतः फलं वा क्रियां वा सद्वा वस्तु नाशयतः मिथ्या वा विकल्पयतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः । कुशलमूलसमुच्छेदकर्मिका, अकुशलमूलदृढतासन्निश्रयदानकर्मिका, अकुशले



प्रवृत्तिकर्मिका, कुशले चाऽप्रवृत्तिकर्मिका वा ॥ या एताः पञ्च दृष्टय आसां कति समारोपदृष्टयः कत्यपवाददृष्टयः । चतस्रः समारोपदृष्टयः । ज्ञेये स्वभावविशेषसमारोपतामुपादाय दृष्टौ चाग्रशुद्धिसमारोपतामुपादाय ॥ एका यद्भूयसा अपवाददृष्टिः ॥ याश्च पूर्वान्तकल्पिका दृष्टयो याश्चापरान्तकल्पिका दृष्टयः, ताः कतिभ्यो दृष्टिभ्यो वेदितव्याः । द्वाभ्यां सर्वाभ्यो वा ॥ या अव्याकृतवस्तुषु दृष्टयस्ताः कतिभ्यो दृष्टिभ्यो वेदितव्याः । द्वाभ्यां सर्वाभ्यो वा ॥ कं दोषं पश्यता भगवता स्कन्धधात्वायतनेषु पञ्चभिः कारणैरात्मा प्रतिक्षिप्तः । सत्कायदृष्टिपरिगृहीतान्पञ्च दोषान्पश्यता । विलक्षणतादोषं, अनित्यतादोषं, अ[ स्वातंत्र्य ]दोषं, निर्देहतादोषं, अयत्नतोमोक्षदोषञ्च ॥ या पञ्चसूपादानस्कन्धेषु विंशतिकोटिका सत्कायदृष्टिः——रूप[ मा ]त्मेति समनुपश्यति, रूपवन्तमात्मानं, आत्मीयं रूपं, रूपे आत्मानं, वेदनां संज्ञा संस्कारान्विज्ञानमात्मेति समनुपश्यति, विज्ञानवन्तमात्मानं, आत्मीयं विज्ञानं, विज्ञाने आत्मानं—— तत्र कत्यात्मदृष्टयः कत्यात्मीयदृष्टयः । पञ्चात्मदृष्टयः पञ्चदशात्मीयदृष्टयः ॥ केन कारणेन प[ ञ्चदशा ]त्मीयदृष्टयः । सम्बन्धात्मीयतामुपादाय, वशवर्तनात्मीयतामुपादाय, अविनिर्भागवृत्त्यात्मीयतां चोपादाय ॥ सत्कायदृष्टिर्निरूपितवस्तुका वक्तव्या, अनिरूपितवस्तुका वक्तव्या । अनिरूपितवस्तु[ का ] वक्तव्या रज्ज्वां सर्पबुद्धिवत् ॥

क्रोधः कतमः । प्रत्युपस्थितेऽपकारनिमित्ते प्र[ तिघां ]शिकश्चेतस आघातः । शस्त्रादानदण्डादानादिसंरम्भसन्निश्रयदानकर्मकः ॥ उपनाहः कतमः । तत ऊर्ध्वं प्रतिघांशिक एव वैराशयस्याऽनुत्सर्गः । अक्षान्तिसन्निश्रयदानकर्मकः ॥ म्रक्षः कतमः । सम्यक्चोदितस्य मोहांशिका (fol. 4b) अवद्यप्रच्छादना । कौकृत्यास्पर्शविहारसन्निश्रयदानकर्मकः ॥ प्रदाशः कतमः । प्रतिघांशिकः क्रोधोपनाहपूर्वङ्गमश्चेतस आघातः । उच्चप्रगाढपारुष्यवचनसन्निश्रयदानकर्मकोऽपुण्यप्रसवकर्मकोऽस्पर्शविहारकर्मकश्च ॥ ईर्ष्या कतमा । लाभसत्काराध्यवसितस्य परसंपत्तिविशेषे द्वेषांशिकोऽ[ मर्ष ]कृतश्चेतसो व्यारोषः । दौर्मनस्यास्पर्शविहारकर्मिका ॥ मात्सर्यं कतमत् । लाभसत्काराध्यवसितस्य परिष्कारेषु रागांशिकश्चेतस आग्रहः । असंलेखसन्निश्रयदानकर्मकम् ॥ माया कतमा । लाभसत्काराध्यवसितस्य रागमोहांशिकाऽभूतगुणसंदर्शना । मिथ्याजीवसन्निश्रयदानकर्मिका । शाठ्यं क[ तमत् । ] लाभसत्काराध्यवसितस्य रागमोहांशिका भूतदोषविमालना सम्यगववादलाभपरिपन्थकरम् ॥ मदः कतमः । आरोग्यं वा आगम्य यौवनं वा, दीर्घायुष्कलक्षणं वोपलभ्यान्यतमान्यतमां वा सास्रवां संपत्तिं रागांशिकं नन्दीसौमनस्यम् । सर्वक्लेशोपक्लेशसन्निश्रयदानकर्मकः ॥ विहिंसा कतमा । प्रति[ घांशि ]का निर्घृणता निष्करुणता निर्द[ यता ] । विहेठनकर्मिका । आह्रीक्यं कतमत् । रागद्वेषमोहांशिका स्वयमवद्येनाऽलज्जना । सर्वक्लेशोपक्लेशसाहाय्यकर्मकम् ॥ अनपत्राप्यं कतमत् । रागद्वेषमोहांशिका परतोऽवद्येनाऽलज्जना । सर्वक्लेशोपक्लेशसाहाय्यकर्मकम् ॥ स्त्यानं कतमत् । मोहांशिका चित्ताकर्मण्य[ ता । स ]र्वक्लेशोपक्लेशसाहाय्यकर्मकम् ॥ औद्धत्यं कतमत् । शुभनिमित्तमनुसरतो रागांशिकश्चेतसोऽव्युपशमः । शमथपरिपन्थकर्मकम् ॥ आश्रद्ध्यं कतमत् । मोहांशिकः कुशलेषु धर्मेषु चेतसोऽनभिसंप्रत्ययोऽप्रसादोऽनभिलाषः । कौसीद्यसन्निश्रयदानकर्मकम् ॥ कौसीद्यं कतमत् । निद्रापार्श्वशयनसुखल्लिकामागम्य मोहांशिकश्चेतसोऽनभ्युत्साहः । कुशलपक्षप्रयोगपरिपन्थकर्मकः ॥ प्रमादः कतमः । सकौसीद्यान् लोभद्वेषमोहान्निश्रित्य

कुशलानां धर्माणामभावना सास्रवेभ्यश्च धर्मेभ्यश्चेतसोऽनारक्षा । अकुशलवृद्धिकुशलपरिहाणि-सन्निश्रयदानकर्मकः ।। मुषितस्मृतिता कतमा । क्लेशसंप्रयुक्ता स्मृतिः । विक्षेपसन्निश्रयदानकर्मिका ।। असंप्रजन्यं कतमत् । क्लेशसंप्रयुक्ता प्रज्ञा यथाऽसंविदिता कायवाक्चित्तचर्या प्रवर्तते । आपत्ति-सन्निश्रयदानकर्मकम् ।। विक्षेपः कतमः । रागद्वेषमोहांशिकश्चेतसो विसारः । स पुनः स्वभाव-विक्षेपः, बहिर्धाविक्षेपः, अध्यात्मविक्षेपः, निमि[त्त]विक्षेपः, दौष्ठुल्यविक्षेपः, मनसिकारविक्षेपश्च ।। स्वभावविक्षेपः कतमः । पञ्च विज्ञानकायाः ।। बहिर्धाविक्षेपः कतमः । कुशलप्रयुक्तस्य पञ्चसु कामगुणेषु चेतसो विसारः ।। अध्यात्मविक्षेपः कतमः । (fol. 5a) कुशलप्रयुक्तस्य लयौद्धत्या-स्वादना ।। निमित्तविक्षेपः कतमः । परसम्भावनां संपुरस्कृत्य कुशलप्रयोगः ।। दौष्ठुल्यविक्षेपः कतमः । अहंकारममकारास्मिमानपक्ष्यं दौष्ठुल्यमागम्य कुशलप्रयुक्तस्योत्पन्नोत्पन्नेषु वेदितेष्वहमिति वा ममेति वाऽस्मीति वा उद्ग्रहो व्यवकिरणा निमित्तीकारः ।। मनसिकारविक्षेपः कतमः । समापत्त्यन्तरं वा यानान्तरं वा समापद्यमानस्य संश्रयतो वा यो विसारः । वैराग्यपरिपन्थकर्मकः ।।

मिद्धं कतमत् । मिद्धनिमित्तमागम्य मोहांशिकश्चेतसोऽभिसंक्षेपः, कुशलः, अकुशलः, अव्याकृतः, काले वा अकाले वा, युक्तो वा अयुक्तो वा । कृत्यातिपत्तिसन्निश्रयदानकर्मकः ।। कौकृत्यं कतमत् । यदभिप्रेतानभिप्रेतं कारणाकारणमागम्य मोहांशिकश्चेतसो विप्रतिसारः, कुशलमकुशलमव्याकृतं, काल अकाले, युक्तमयुक्तञ्च । चित्तस्थितिपरिपन्थकर्मकः ।। वितर्कः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पः । सा च चित्तस्यौदारिकता ।। विचारः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पः । सा च चित्तस्य सूक्ष्मता ।। स्पर्शास्पर्शविहारसन्निश्रयदान-कर्मकौ ।। अपि खलु कुशलानां धर्माणां स्वविपक्षप्रहाणं कर्म ।। क्लेशोपक्लेशानां स्वप्रतिपक्ष-परिपन्थनं कर्म ।।

चित्तविप्रयुक्ताः संस्काराः कतमे । प्राप्तिरसंज्ञिसमापत्तिर्निरोधसमापत्तिरासंज्ञिकं जीवितेन्द्रियं निकायसभागता जातिर्जरास्थितिरनित्यता नामकायाः पदकायाः व्यञ्जनकायाः पृथग्जनत्वं प्रवृत्तिः प्रतिनियमो योगो जवोऽनुक्रमः कालो देशः संख्या सामग्री च ।। प्राप्तिः कतमा । कुशलाकुशलानां धर्माणां साचयापचये प्राप्तिः प्रतिलम्भः समन्वागम इति प्रज्ञप्तिः ।। असंज्ञिसमापत्तिः कतमा । शुभकृत्स्नवीतरागस्यो[पर्य]वीतरागस्य निःसरणसंज्ञापूर्वकेण मनसिकारेणाऽस्थावराणां चित्तचैतसिकानां धर्माणां निरोधे असंज्ञिसमापत्तिरिति प्रज्ञप्तिः ।। निरोधसमापत्तिः कतमा । आकिञ्चन्यायतन-वीतरागस्य भवाग्रात् चलितस्य शान्तविहारसंज्ञापूर्वकेण मनसिकारेणाऽस्थावराणां चित्तचैतसिकानां धर्माणां निरोधे निरोधसमापत्तिरिति प्रज्ञप्तिः ।। आसंज्ञिकं कतमत् । असंज्ञिसत्त्वेषु देवेषूपपन्नस्याऽ-स्थावराणां चित्तचैतसिकानां धर्माणां निरोधे आसंज्ञिकमिति प्रज्ञप्तिः ।। जीवितेन्द्रियं कतमत् । निकायसभागे पूर्वकर्माविद्धे स्थितिकालनियमे आयुरिति प्रज्ञप्तिः ।। निकायसभागः कतमः । तेषां तेषां सत्त्वानां तस्मिं-(fol. 5b) स्तस्मिन् सत्त्वनिकाये आत्मभावसदृशतायां निकायसभाग इति प्रज्ञप्तिः ।। जातिः कतमा । निकायसभागे संस्काराणामभूत्वा भावे जातिरिति प्रज्ञप्तिः ।। जरा कतमा । निकायसभागे संस्काराणां प्रबन्धान्यथात्वे जरेति प्रज्ञप्तिः ।। स्थितिः कतमा । निकायसभा[गे] संस्काराणां प्रबन्धाविप्रणाशे स्थितिरिति प्रज्ञप्तिः ।। अनित्यता कतमा । निकाय-





सभागे संस्काराणां प्रबन्धविनाशेऽनित्यतेति प्रज्ञप्तिः ।। नामकायाः कतमे । धर्माणां स्वभावाधि-वचने नामकाया इति प्रज्ञप्तिः ।। पदकायाः कतमे । धर्माणां विशेषाधिवचने पदकाया इति प्रज्ञप्तिः ।। व्यञ्जनकायाः कतमे । तदुभयाश्रयेष्वक्षरेषु व्यञ्जनकाया इति प्रज्ञप्तिः, तदुभयाभि-व्यञ्जनतामुपादाय ।। वर्णोऽपि सः, अर्थसंवर्णनतामुपादाय ।। अक्षरं पुनः पर्यायाक्षरणतामुपादाय ।। पृथग्जनत्वं कतमत् । आर्यधर्माणामप्रतिलम्भे पृथग्जनत्वमिति प्रज्ञप्तिः ।। प्रवृत्तिः कतमा । हेतु-फलप्रबन्धानुपच्छेदे प्रवृत्तिरिति प्रज्ञप्तिः ।। प्रतिनियमः कतमः । हेतुफलनानात्वे प्रतिनियम इति प्रज्ञप्तिः ।। योगः कतमः । हेतुफलानुरूप्ये योग इति प्रज्ञप्तिः ।। जवः कतमः । हेतुफलाशुप्रवृत्तौ जव इति प्रज्ञप्तिः ।। अनुक्रमः कतमः । हेतुफलैकत्वप्रवृत्तावनुक्रम इति प्रज्ञप्तिः ।। कालः कतमः । हेतुफलप्रबन्धप्रवृत्तौ काल इति प्रज्ञप्तिः ।। देशः कतमः । पूर्वदक्षिणपश्चिमोत्तराधरोर्ध्वासु सर्वतो दशसु दिक्षु हेतुफल एव देश इति प्रज्ञप्तिः ।। संख्या कतमा । संस्काराणां प्रत्येकशो भेदे संख्येति प्रज्ञप्तिः ।। सामग्री कतमा । हेतुफलप्रत्ययसमवधाने सामग्रीति प्रज्ञप्तिः ।।

विज्ञानस्कन्धव्यवस्थानं कतमत् । यच्चित्तं मनो विज्ञानमपि ।। तत्र चित्तं कतमत् । स्कन्धधात्वायतनवासनापरिभावितं सर्वबीजकमालयविज्ञानम् । विपाकविज्ञानमादानविज्ञानमपि तत्, तद्वासनाचिततामुपादाय ।। मनः कतमत् । यन्नित्यकालं मन्यनात्मकमालयविज्ञानालम्बनं चतुर्भिः क्लेशैः संप्रयुक्तमात्मदृष्टयात्मस्नेहेनाऽस्मिमानेनाऽविद्यया च । तच्च सर्वत्रगं कुशलेप्यकुशलेप्यव्याकृतेऽपि स्थाप-यित्वा मार्गसंमुखीभावं निरोधसमापत्तिमशैक्षभूमिञ्च, यच्च षण्णां विज्ञानानां समनन्तरनिरुद्धं विज्ञानम् ।। विज्ञानं कतमत् । षड्विज्ञानकायाः । चक्षुर्विज्ञानं श्रोत्रघ्राणजिह्वाकायमनोविज्ञानम् ।। चक्षुर्विज्ञानं कतमत् । चक्षुराश्रया रूपालम्बना प्रतिविज्ञप्तिः ।। श्रोत्रविज्ञानं कतमत् । श्रोत्राश्रया शब्दालम्बना प्रतिविज्ञप्तिः ।। घ्राणविज्ञानं कतमत् । [घ्राणाश्रया गन्धालम्बना प्रतिविज्ञप्तिः ।। जिह्वाविज्ञानं कतमत् । जिह्वाश्रया रसालम्बना प्रतिविज्ञप्तिः ।। कायविज्ञानं कतमत् । काया-श्रया स्प्रष्टव्यालम्बना प्रतिविज्ञप्तिः ।। मनोविज्ञानं कतमत् । मनआश्रया धर्मालम्बना प्रति-विज्ञप्तिः ।। ]

(*Lacuna:* Skt. 6-7; Tib. 57b$^{1}$–61a$^{6}$; Ch. 666a$^{13}$–667b$^{7}$)

B

(fol. 8a) [असंस्कृ]तं धर्मधात्वायतनैकदेशः ।। अपि खलु ज्ञेया धर्मा अधिमुक्तिज्ञानगोचरतोऽपि, युक्तिज्ञानगोचरतोऽपि, अविसारज्ञानगोचरतोऽपि, प्रत्यात्मज्ञानगोचरतोऽपि, परात्मज्ञानगोचरतोऽपि, अवरज्ञानगोचरतोऽपि, उर्ध्वज्ञानगोचरतोऽपि, विदूषणज्ञानगोचरतोऽपि, [अ]समुत्थानज्ञानगोचरतोऽपि, अनुत्पादज्ञानगोचरतोऽपि, ज्ञानज्ञानगोचरतोऽपि, निष्ठाज्ञानगोचरतोऽपि, महार्थज्ञानगोचरतोऽपि । जानकपश्यकात्माभिनिवेशत्याजनार्थम् ।।

कथं विज्ञेयम्, कति विज्ञेयानि, किमर्थं विज्ञेयपरीक्षा । अविकल्पनतोऽपि, विकल्पनतोऽपि, हेतुतोऽपि, प्रवृत्तितोऽपि, निमित्ततोऽपि, नैमित्तिकतोऽपि, विपक्षप्रतिपक्षतोऽपि, सूक्ष्मप्रभेदतोऽपि विज्ञेयं द्रष्टव्यम् । सर्वाणि विज्ञेयानि । द्रष्ट्राद्यात्माभिनिवेशत्याजनार्थम् ।।

कथमभिज्ञेयम्, कत्यभिज्ञेयानि, किमर्थमभिज्ञेयपरीक्षा । संक्रान्तितोऽपि, अनुश्रवतोऽपि, चरितप्रवेशतोऽपि, आगतितोऽपि, गतितोऽपि, निःसरणतोऽपि । सर्वाण्यभिज्ञेयानि । सानुभावात्माभिनिवेशत्याजनार्थम् ॥

कथं रूपि, कति रूपीणि, किमर्थं रूपिपरीक्षा । रूपितदात्मतोऽपि, भूताश्रयतोऽपि, नन्दीसमुदयतोऽपि, प्रदेशतोऽपि, देशव्याप्तितोऽपि, देशोपदे[ श ]तोऽपि, देशगोचरतोऽपि, द्वयसमगोचरतोऽपि, सम्बन्धतोऽपि, अनुबन्धतोऽपि, प्ररूपणतोऽपि, व्याबाधनतोऽपि, संप्रापणतोऽपि, संचयव्यवस्थानतोऽपि, बहिर्मुखतोऽपि, अन्तर्मुखतोऽपि, आयततोऽपि, परिच्छिन्नतोऽपि, तत्कालतोऽपि, निदर्शनतोऽपि, रूपि द्रष्टव्यम् । सर्वाणि रूपीणि । यथायोगं वा । रूप्यात्माभिनिवेशत्याजनार्थम् ॥

कथमरूपि, कत्यरूपीणि, किमर्थमरूपिपरीक्षा । रूपिविपर्ययेणाऽप्यरूपि । सर्वाण्यरूपीणि । यथायोगं वा । अरूप्यात्माभिनिवेशत्याजनार्थम् ॥

कथं सनिदर्शनं, कति सनिदर्शनानि, किमर्थं सनिदर्शनपरीक्षा । चक्षुर्गोचरः सनिदर्शनम् । शिष्टस्य रूपिवत्प्रभेदः । सर्वाणि सनिदर्शनानि । यथायोगं वा । चक्षुषात्माभिनिवेशत्याजना-(fol. 8b) र्थम् ॥

कथमनिदर्शनं, कत्यनिदर्शनानि, किमर्थमनिदर्शनपरीक्षा । सनिदर्शनविपर्ययेणानिदर्शनं द्रष्टव्यम् । सर्वाण्यनिदर्शनानि । यथायोगं वा । [ अ ]चक्षुषात्माभिनिवेशत्याजनार्थम् ॥

कथं सप्रतिघं, कति सप्रतिघानि, किमर्थं सप्रतिघपरीक्षा । यत्सनिदर्शनं सप्रतिघमपि तत् । अपि खलु त्रिभिः कारणैः सप्रतिघं द्रष्टव्यं, जातितोऽपि, उपचयतोऽपि, अपरिकर्मकृततोऽपि ॥ तत्र जातितः, य[ द ]न्योन्यमावृणोत्याव्रियते च ॥ तत्रोपचयः परमाणोरूर्ध्वम् ॥ तत्राऽपरिकर्मकृततः, यन्न समाधिवशवर्तिरूपम् ॥ अपि खलु प्रकोपपदस्थानतः सप्रतिघम् । सर्वाणि सप्रतिघानि । यथायोगं वा । असर्वगतात्माभिनिवेशत्याजनार्थम् ॥

कथमप्रतिघं, कत्यप्रतिघानि, किमर्थमप्रतिघपरीक्षा । सप्रतिघविपर्ययेणाऽप्रतिघम् । सर्वाण्यप्रतिघानि । यथायोगं वा । सर्वगतात्माभिनिवेशत्याजनार्थम् ॥

कथं सास्रवं, कति सास्रवाणि, किमर्थं सास्रवपरीक्षा । आस्रवतदात्मतोऽपि, आस्रवसम्बन्धतोऽपि, आस्रवानुबन्धतोऽपि, आस्रवानुकूल्यतोऽपि, आस्रवान्वयतोऽपि, सास्रवं द्रष्टव्यम् । पञ्चोपादानस्कन्धाः सास्रवाः पञ्चदश धातवः, दशायतनानि, त्रयाणां धातूनां द्वयोश्चायतनयोः प्रदेशः । आस्रवयुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथमनास्रवं, कत्यनास्रवाणि, किमर्थमनास्रवपरीक्षा । सास्रवविपर्ययेणाऽनास्रवम् । पञ्चाऽनुपादानस्कन्धाः, त्रयाणां धातूनां द्वयोश्चायतनयोः प्रदेशः । आस्रववियुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं सरणं, कति सरणानि, किमर्थं सरणपरीक्षा । यद्रूपान्रागद्वेषमोहानागम्य शस्त्रादानदण्डादानकलहभण्डनविग्रहविवादाः सम्भवन्ति, तदात्मतोऽपि, तत्सम्बन्धतोऽपि, तद्बन्धतोऽपि, तदनुबन्धतोऽपि, तदानुकूल्यतोऽपि, तदन्वयतोऽपि, सरणं द्रष्टव्यम् । यावन्ति सास्रवाणि तावन्ति सरणानि । रणयुक्तात्माभिनिवेशत्याजनार्थम् ॥



कथमरणं, कत्यरणानि, किमर्थमरणपरीक्षा । सरणविपर्ययेणाऽरणम् । यावन्त्यनास्रवाणि तावन्त्यर-(fol. 9a) णानि । रणविप्रयुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं सामिषं, कति सामिषाणि, किमर्थं सामिषपरीक्षा । यद्रूपान्रागद्वेषमोहानागम्य पौनर्भविकमात्मभावमध्यवस्यति, तदात्मतोऽपि, तत्सम्बन्धतोऽपि, तद्बन्धतोऽपि, तदनुबन्धतोऽपि, तदानुकूल्यतोऽपि, तदन्वयतोऽपि, सामिषं द्रष्टव्यम् । यावन्ति सरणानि तावन्ति सामिषाणि । आमिषयुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं निरामिषं, कति निरामिषाणि, किमर्थं निरामिषपरीक्षा । सामिषविपर्ययेण निरामिषम् । यावन्त्यरणानि तावन्ति निरामिषाणि । आमिषवियुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं ग्रेधाश्रितं, कति ग्रेधाश्रितानि, किमर्थं ग्रेधाश्रितपरीक्षा । यद्रूपान्रागद्वेषमोहानागम्य पञ्चकामगुणानध्यवस्यति, तदात्मतोऽपि, तत्सम्बन्धतोऽपि, तद्बन्धतोऽपि, तदनुबन्धतोऽपि, तदानुकूल्यतोऽपि, तदन्वयतोऽपि, ग्रेधाश्रितं द्रष्टव्यम् । यावन्ति सामिषाणि तावन्ति ग्रेधाश्रितानि । ग्रेधयुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं नैष्क्रम्याश्रितं, कति नैष्क्रम्याश्रितानि, किमर्थं नैष्क्रम्याश्रितपरीक्षा । ग्रेधाश्रितविपर्ययेण नैष्क्रम्याश्रितम् । यावन्ति निरामिषाणि तावन्ति नैष्क्रम्याश्रितानि । ग्रेधावियुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथं संस्कृतं, कति संस्कृतानि, किमर्थं संस्कृतपरीक्षा । यस्योत्पादोऽपि प्रज्ञायते व्ययोऽपि स्थित्यन्यथात्वमपि तत्सर्वं संस्कृतं द्रष्टव्यम् । सर्वाणि संस्कृतानि, स्थापयित्वा धर्मधात्वायतनैकदेशम् । अनित्याभिनिवेशत्याजनार्थम् ॥

कथमसंस्कृतं, कत्यसंस्कृतानि, किमर्थमसंस्कृतपरीक्षा । संस्कृतविपर्ययेणासंस्कृतम् । धर्मधात्वायतनैकदेशः । नित्यात्माभिनिवेशत्याजनार्थम् ॥ अनुपादानस्कन्धाः संस्कृतं वक्तव्यमसंस्कृतं वक्तव्यम् । न संस्कृतं नाऽसंस्कृतं वक्तव्यम् । तत्कस्य हेतोः । कर्मक्लेशानभिसंस्कृततामुपादाय न संस्कृतम् । कामकारसंमुखीविमुखीभावतामुपादाय नाऽसंस्कृतम् । यदुक्तं भगवता— द्वयमिदं संस्कृतञ्चाऽसंस्कृतं चेति—तत्कथम् । येनार्थेन संस्कृतं (fol. 9b) न तेनार्थेनाऽसंकृतम् । येनाऽसंस्कृतं न तेनार्थेन संस्कृतमित्ययमत्र नयो द्रष्टव्यः ॥

कथं लौकिकं, कति लौकिकानि, किमर्थं लौकिकपरीक्षा । त्रैधातुकपर्यापन्नं लौकिकं लोकोत्तरपृष्ठलब्धं च तत्प्रतिभासम् । स्कन्धानामेकदेशः, पञ्चदश धातवः, दशायतनानि, त्रयाणां च धातूनां द्वयोश्चायतनयोः प्रदेशः । आत्मनि लोकाभिनिवेशत्याजनार्थम् ॥

कथं लोकोत्तरं, कति लोकोत्तराणि, किमर्थं लोकोत्तरपरीक्षा । त्रैधातुकप्रतिपक्षः, विपर्यासनिष्प्रपञ्चनिर्विकल्पतया च निर्विकल्पं लोकोत्तरम् । अपि खलु पर्यायेण लोकोत्तरपृष्ठलब्धं लोकोत्तरं, लौकिकाश्रिततामुपादाय । स्कन्धानामेकदेशः, त्रयाणां धातूनां द्वयोश्चायतनयोः । केवलात्माभिनिवेशत्याजनार्थम् ॥

कथमुत्पन्नं, कत्युत्पन्नानि, किमर्थमुत्पन्नपरीक्षा । अतीतप्रत्युत्पन्नमुत्पन्नम् । सर्वेषामेकदेशः । अशाश्वतात्माभिनिवेशत्याजनार्थम् ॥ अपि खलु चतुर्विंशतिविधमुत्पन्नम्, आद्युत्पन्नं, प्रबन्धोत्पन्नं,

उपचयोत्पन्नं, आश्रयोत्पन्नं, विकारोत्पन्नं, परिपाकोत्पन्नं, हान्युत्पन्नं, विशेषोत्पन्नं, प्रभास्वरोत्पन्नं, अप्रभास्वरोत्पन्नं, संक्रान्त्युत्पन्नं, सबीजोत्पन्नं, अबीजोत्पन्नं, प्रतिबिम्बविभुत्वनिदर्शनोत्पन्नं, परम्परोत्पन्नं, क्षणभङ्गोत्पन्नं, संयोगवियोगोत्पन्नं, अवस्थान्तरोत्पन्नं, च्युतोपपादोत्पन्नं, संवर्तविवर्तोत्पन्नं, पूर्वकालोत्पन्नं, मरणकालोत्पन्नं, अन्तरोत्पन्नं, प्रतिसंधिकालोत्पन्नञ्च ॥

कथमनुत्पन्नं, कत्यनुत्पन्नानि, किमर्थमनुत्पन्नपरीक्षा । अनागतमसंस्कृतं चाऽनुत्पन्नम् । सर्वेषामेकदेशः । शाश्वतात्माभिनिवेशत्याजनार्थम् ॥ अपि खलूत्पन्नविपर्ययेणाऽनुत्पन्नम् ॥

कथं ग्राहकं, कति ग्राहकानि, किमर्थं ग्राहकपरीक्षा । रूपीन्द्रियं चित्तचैतसिकाश्च धर्मा ग्राहकं द्रष्टव्यम् । त्रयः स्कन्धाः, रूपसंस्कारस्कन्धैकदेशः, द्वादश धातवः, षडायतनानि, धर्मधात्वायतनैकदेशश्च । भोक्त्रात्माभिनिवेशत्याजनार्थम् ॥ (fol. 10a) अपि खलु अप्राप्तग्राहकं, प्राप्तग्राहकं, स्वलक्षणवर्तमानप्रत्येकग्राहकं, स्वसामान्यलक्षणसर्वकालसर्वविषयग्राहकञ्च ग्राहकं द्रष्टव्यम् । सामग्रीविज्ञानसमुत्पत्तितामुपादाय प्राज्ञप्तिकश्च ग्राहकवादो द्रष्टव्यः ॥

कथं ग्राह्यं, कति ग्राह्याणि, किमर्थं ग्राह्यपरीक्षा । यदेव ग्राहकं ग्राह्यमपि तत् । स्याद् ग्राह्यं न ग्राहकः । ग्राहकगोचर एवार्थः । सर्वाणि [ग्राह्याणि] विषयात्माभिनिवेशत्याजनार्थम् ॥

कथं बहिर्मुखं, कति बहिर्मुखानि, किमर्थं बहिर्मुखपरीक्षा । कामप्रतिसंयुक्तं बहिर्मुखं, स्थापयित्वा बुद्धशासने श्रुतमयचिन्तामयतदनुधर्मपरिगृहीतांश्चित्तचैतसिकान्धर्मान् । चत्वारो धातवः, द्वे चायतने, तदन्येषां चैकदेशः । अवीतरागात्माभिनिवेशत्याजनार्थम् ॥

कथमन्तर्मुखं, कत्यन्तर्मुखानि, किमर्थमन्तर्मुखपरीक्षा । बहिर्मुखविपर्ययेणाऽन्तर्मुखम् । चत्वारो धातून् स्थापयित्वा द्वे चायतने तदन्येषामेकदेशः । वीतरागात्माभिनिवेशत्याजनार्थम् ॥

कथं क्लिष्टं, कति क्लिष्टानि, किमर्थं क्लिष्टपरीक्षा । अकुशलं निवृताव्याकृतञ्च क्लिष्टम् । निवृताव्याकृतं पुनः सर्वत्रगमनः संप्रयुक्तः क्लेशो रूपारूप्यप्रतिसंयु[क्त]श्च । स्कन्धानां, दशानां धातूनां, चतुर्णामायतनानामेकदेशः । क्लेशयुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथमक्लिष्टं, कत्यक्लिष्टानि, किमर्थमक्लिष्ट[प]रीक्षा । कुशलमनिवृताव्याकृतं चाऽक्लिष्टम् । अष्टौ धातवः, अष्टायतनानि, स्कन्धानां शेषाणाञ्च धात्वायतनानामेकदेशः । क्लेशवियुक्तात्माभिनिवेशत्याजनार्थम् ॥

कथमतीतं, कत्यतीतानि, किमर्थमतीतपरीक्षा । उत्पन्नविरुद्धलक्षणतोऽपि, हेतुफलोपयोगितोऽपि, संक्लेशव्यवदानकारित्रसमतिक्रान्ततोऽपि, हेतुपरिग्रहविनाशतोऽपि, फलस्वलक्षणभावाभावतोऽपि, स्मर[ण]संकल्पनिमित्ततोऽपि, अपेक्षासंक्लेशनिमित्ततोऽपि, उपेक्षाव्यवदाननिमित्ततोऽपि, अतीतं द्रष्टव्यम् । सर्वेषामेकदेशः । प्रवर्तकात्माभिनिवेशत्याजनार्थम् ॥

कथमनागतं, कत्यनागतानि, किमर्थमनागतपरीक्षा । हेतौ सत्यनुत्पन्नतोऽपि, अलब्धस्वलक्षणतोऽपि, हेतुफलानुपयोगतोऽपि, संक्लेशव्यवदानभावाप्रत्युपस्थानतोऽपि, हेतु[स्वलक्षण]भावाभावतोऽपि, अभिनन्दनासंक्लेशनिमित्ततोऽपि, अनभिनन्दनाव्यवदाननिमित्ततोऽपि, अनागतं द्रष्टव्यम् । सर्वेषामेकदेशः । प्रवर्तकात्माभिनिवेशत्याजनार्थम् ॥



(fol. 10b) कथं प्रत्युत्पन्नं, कति प्रत्युत्पन्नानि, किमर्थं प्रत्युत्पन्नपरीक्षा । उत्पन्नानिरुद्धलक्षणतोऽपि, हेतुफलोपयोगानुपयोगतोऽपि, संक्लेशव्यवदानप्रत्युपस्थानतोऽपि, अतीतानागत[प्र]भाव[ना]निमित्ततोऽपि, कारित्रप्रत्युपस्थानतोऽपि प्रत्युत्पन्नं द्रष्टव्यम् । सर्वेषामेकदेशः । प्रवर्तकात्माभिनिवेशत्याजनार्थमेव ॥ अतीतानागतप्रत्युत्पन्नं पुनः कथावस्तु । न निर्वाणं प्रत्यात्मवेदनीयतया, निरभिलप्यतामुपादाय, भूतभव्यवर्तमान[व्यव]हाराधिष्ठानतां चोपादाय ॥

कथं कुशलं, कति कुशलानि, किमर्थं कुशलपरीक्षा । स्वभावतोऽपि, संबन्धतोऽपि, अनुबन्धतोऽपि, उत्थानतोऽपि, परमार्थतोऽपि, उपपत्तिलाभतोऽपि, प्रयोगतोऽपि, पुरस्कारतोऽपि, अनुग्रहतोऽपि, परिग्रहतोऽपि, प्रतिपक्षतोऽपि, उपशमतोऽपि, निष्यन्दतोऽपि, कुशलं द्रष्टव्यम् । स्कन्धानां, दशानां धातूनां, चतुर्णाञ्चायतनानां प्रदेशः । धर्मयुक्तात्माभिनिवेशत्याजनार्थम् ॥ स्वभावतः कुशलं कतमत् । श्रद्धादय एकादश चैतसिका धर्माः ॥ संबन्धतः कुशलं कतमत् । तत्संप्रयुक्ता धर्माः ॥ अनुबन्धतः कुशलं कतमत् । तेषामेव या वासना । उत्थानतः कुशलं कतमत् । तत्समुत्थितं कायकर्म वाक्कर्म ॥ परमार्थतः कुशलं कतमत् । तथता ॥ उपपत्तिलाभतः कुशलं कतमत् । एषामेव कुशलानां धर्माणां पूर्वाभ्यासमागम्य तद्रूपा विपाकाभिनिर्वृत्तिः, यथा तेष्वेव प्रकृत्याऽप्रतिसंख्याय रुचिः संतिष्ठते ॥ प्रयोगतः कुशलं कतमत् । सत्पुरुषसंसेवामागम्य सद्धर्मश्रवणं योनिशो मनस्कारं धर्मानुधर्मप्रतिपत्तिं कुशलस्य भावना ॥ पुरस्कारतः कुशलं कतमत् । यत्तथागतं वा पुरस्कृत्य चैत्ये वा पुस्तगते वा चित्रगते वा, धर्मं वा पुरस्कृत्य धर्माधिष्ठाने पुस्तके पूजाकर्म ॥ अनुग्रहतः कुशलं कतमत् । यच्चतुर्भिः संग्रहवस्तुभिः सत्त्वाननुगृह्णतः ॥ परिग्रहतः कुशलं कतमत् । यद्दानमयेन पुण्यक्रियावस्तुना वा शीलमयेन वा, स्वर्गोपपत्तिपरिग्रहो वा, आढ्योच्चकुलोपपत्तिपरिग्रहो वा, व्यवदानानुकूल्यपरिग्रहो वा ॥ प्रतिपक्षतः कुशलं कतमत् । यो विदूषणाप्रतिपक्षः, प्रहाणप्रतिपक्षः, आधारप्रतिपक्षः, दूरीभावप्रतिपक्षः, विष्कम्भणाप्रतिपक्षः, विसंयोगप्रतिपक्षः, क्लेशावरणप्रतिपक्षः, ज्ञेयावरणप्रतिपक्षः ॥ उपशमतः कुशलं कतमत् । यत्तत्पर्यादाय राग[प्रहाणं], पर्यादाय द्वेष[प्रहाणं], पर्यादाय मोह[प्रहाणं], (fol. 11a) पर्यादाय सर्वक्लेशप्रहाणं, संज्ञावेदयितनिरोधः, सोपाधिशेषो निरुपाधिशेषो निर्वाणधातुः, अप्रतिष्ठितनिर्वाणञ्च ॥ निष्यन्दतः कुशलं कतमत् । उपशमप्राप्तस्य तदाधिपत्येन वैशेषिका गुणा अभिज्ञादयो लौकिकलोकोत्तराः साधारणासाधारणाः ॥

कथमकुशलं, कत्यकुशलानि, किमर्थमकुशलपरीक्षा । स्वभावतोऽपि, संबन्धतोऽपि, अनुबन्धतोऽपि उत्थानतोऽपि, परमार्थतोऽपि, उपपत्तिलाभतोऽपि, प्रयोगतोऽपि, पुरस्कारतोऽपि, उपघाततोऽपि, परिग्रहतोऽपि, विपक्षतोऽपि, परिपन्थतोऽप्यकुशलं द्रष्टव्यम् । स्कन्धानां, दशानां धातूनां, चतुर्णामायतनानां प्रदेशः । अधर्मयुक्तात्माभिनिवेशत्याजनार्थम् ॥ स्वभावतोऽकुशलं कतमत् । मनःसंप्रयुक्तं रूपारूप्यावचरञ्च क्लेशं स्थापयित्वा तदन्यः क्लेशोपक्लेशो दुश्चरितसमुत्थापकः ॥ संबन्धतोऽकुशलं कतमत् । तैरेव क्लेशोपक्लेशैः संप्रयुक्ता धर्माः ॥ अनुबन्धतोऽकुशलं कतमत् । तेषामेव वासना ॥ उत्थानतोऽकुशलं कतमत् । [तत्-]समुत्थापितं कायवाक्कर्म ॥ परमार्थतोऽकुशलं कतमत् । सर्वसंसारः ॥ उपपत्तिलाभतोऽकुशलं कतमत् । यथाऽपि तदकुशलाभ्यासस्तद्रूपो विपाकोऽभिनिर्वर्तते, येनाऽकुशल एव रुचिः संतिष्ठते ॥ प्रयोगतोऽकुशलं कतमत् । यथाऽपि तदसत्पुरुषसंसेवामागम्याऽ-

सद्धर्मश्रवणमयोनिशोमनस्कारं कायेन दुश्चरितं चरति वाचा मनसा दुश्चरितं चरति ।। पुरस्कारतोऽकुशलं कतमत् । यथाऽपि तदन्यतमान्यतमं देवनिकायसंनिश्रयं पुरस्कृत्य हिंसापूर्वकं वा कुदृष्टिपूर्वकं वा चैत्यं प्रतिष्ठापयति, तत्र वा पूजाकर्म प्रयोजयति यत्र महान् जनकायोऽपुण्येन युज्यते ।। उपघाततोऽकुशलं कतमत् । यथाऽपि तत्सत्त्वेषु कायेन वाचा मनसा मिथ्या प्रतिपद्यते ।। परिग्रहतोऽकुशलं कतमत् । यथा तत्कायेन दुश्चरितं चरित्वा वाचा मनसा दुश्चरितं चरित्वा दुर्गतो वा सुगतो वाऽनिष्टं फलं गृह्णात्याक्षेपकं वा परिपूरकं वा ।। विपक्षतोऽकुशलं कतमत् । ये प्रतिपक्षविपक्षा धर्माः ।। परिपन्थतोऽकुशलं कतमत् । ये कुशलान्तरायिका धर्माः ।।

कथमव्याकृतं, कत्यव्याकृतानि, किमर्थमव्याकृतपरीक्षा । स्वभावतोऽपि, संबन्धतोऽपि, अनुबन्धतोऽपि, उत्थानतोऽपि, परमार्थतोऽपि, उपपत्तिलाभतोऽपि, प्रयोगतोऽपि, पुरस्कारतोऽपि, (fol. 11b) अनुग्रहतोऽपि, उपभोगतोऽपि, परिग्रहतोऽपि, प्रतिपक्षतोऽपि, उपशमतोऽपि, निष्यन्दतोऽपि अव्याकृतं द्रष्टव्यम् । अष्टौ धातवः, अष्ट चायतनानि, शेषाणां स्कन्धधात्वायतना[ना]मेकदेशः । धर्माधर्मविमुक्तात्माभिनिवेशत्याजनार्थम् ।। स्वभावतोऽव्याकृतं कतमत् । अष्टौ रूपीणि धात्वायतनानि, ससंप्रयोगं मनोजीवितेन्द्रियं, निकायसभागो नामकायपदकायव्यञ्जनकायाश्च ।। संबन्धतोऽव्याकृतं कतमत् । अदुष्टाप्रसन्नचित्तस्य तैरेव नामपदव्यञ्जनकायैः परिगृहीताः चित्तचैतसिका धर्माः ।। अनुबन्धतोऽव्याकृतं कतमत् । तेषामेवाऽभिलापवासना ।। उत्थानतोऽव्याकृतं कतमत् । तत्परिगृहीतैश्चित्तचैतसिकैर्धर्मैर्यत्समुत्थापितं कायवाक्कर्म ।। परमार्थतोऽव्याकृतं कतमत् । आकाशमप्रतिसंख्यानिरोधश्च ।। उपपत्तिलाभतोऽव्याकृतं कतमत् । अकुशलानां कुशलसास्रवाणां च धर्माणां विपाकः ।। प्रयोगतोऽव्याकृतं कतमत् । अक्लिष्टाकुशलचेतस ऐर्यापथिकं शैल्पस्थानिकञ्च ।। पुरस्कारतोऽव्याकृतं कतमत् । यथाऽपि तदन्यतमान्यतमं देवनिकायसंनिश्रयं पुरस्कृत्य हिंसाकुदृष्टिविवर्जितं चैत्यं वा प्रतिष्ठापयति पूजाकर्म वा प्रयोजयति, यत्र महाजनकायो न पुण्यं प्रसवति नाऽपुण्यम् ।। अनुग्रहतोऽव्याकृतं कतमत् । यथाऽपि तद्दासभृतककर्मकरेषु पुत्रदारेषु वाऽदुष्टाप्रसन्नचित्तो दानं ददाति ।। उपभोगतोऽव्याकृतं कतमत् । यथाऽपि तदप्रतिसंख्यायाऽक्लिष्टचित्तो भोगान्भुङ्क्ते ।। परिग्रहतोऽव्याकृतं कतमत् । यथाऽपि तच्छिल्पस्थानस्याऽभ्यस्तत्वादायत्यां तद्रूपमात्मभावपरिग्रहं करोति येन लघुलघ्वेव तेषु शिल्पस्थानेषु शिक्षानिष्ठां गच्छति ।। प्रतिपक्षतोऽव्याकृतं कतमत् । यथाऽपि तदप्रतिसंख्याय भैषज्यं निषेवते ।। उपशमतोऽव्याकृतं कतमत् । रूपारूप्यावचरः क्लेशः, शमथोपगूढतामुपादाय ।। निष्यन्दतोऽव्याकृतं कतमत् । निर्माणचित्तसहजम् ।। अपि खलु निदर्शनतः कुशलमप्यकुशलमप्यव्याकृतमपि द्रष्टव्यम् ।। तत्पुनः कतमत् । यद्बुद्धाः परमपारमिं प्राप्ताश्च बोधिसत्त्वा निदर्शयन्ति, सत्त्वानामनुग्रहार्थम् । न तु तेषां तत्र तथा काचित्परिनिष्पत्तिः ।।

कथं कामप्रतिसंयुक्तं, कति का[म]प्रतिसंयुक्तानि, किमर्थं कामप्रतिसंयुक्तपरीक्षा । अवीतरागस्य सास्रवकुशलाकुशलाव्याकृतं कामप्रतिसंयुक्तं द्रष्टव्यम् । चत्वारो धातवः, द्वे चायतने, तदन्येषाञ्च स्कन्धधात्वायतनानामेकदेशः । कामावीतरागात्माभिनिवेशत्याजनार्थम् ।।

कथं रूपप्रतिसंयुक्तं, कति रूपप्रतिसंयुक्तानि, किमर्थं रूपप्रतिसंयुक्तपरीक्षा । कामवीतरागस्य रूपावीतरागस्य कुशलाव्याकृतं रूपप्रतिसंयुक्तं द्रष्टव्यम् । (fol. 12a) चत्वारो धातून् द्वे चायतने स्थापयित्वा तदन्येषां स्कन्धधात्वायत[ना]नामेकदेशः । कामवीतरागात्माभिनिवेशत्याजनार्थम् ।।



कथमारूप्यप्रतिसंयुक्तं, कत्यारूप्यप्रतिसंयुक्तानि, किमर्थमारूप्यप्रतिसंयुक्तपरीक्षा । रूपवीतरागस्याऽरूपवीतरागस्य कुशलाव्याकृतमारूप्यप्रतिसंयुक्तं द्रष्टव्यम् । चतुर्णां स्कन्धानां त्रयाणां धातूनां द्वयोश्चायतनयोः प्रदेशः । रूपवीतरागात्माभिनिवेशत्याजनार्थम् ।। वैराग्यं पुनरेकदेशवैराग्यं, सकलवैराग्यं, प्रतिवेधवैराग्यं, उपघातवैराग्यं, समुद्घातवैराग्यञ्च द्रष्टव्यम् ।। अपि खलु [दश] वैराग्याणि । प्रकृतिवैराग्यं, उपघातवैराग्यं, उपस्तम्भवैराग्यं, समुत्कर्षवैराग्यं, संमोहवैराग्यं, प्रतिपक्षवैराग्यं, परिज्ञावैराग्यं, प्रहाणवैराग्यं, सोत्तरं वैराग्यं, निरुत्तरं वैराग्यम् ।। प्रकृतिवैराग्यं कतमत् । दुःखायां वेदनायां दुःखवेदनास्थानीयेषु च धर्मेषु या प्रतिकूलता ।। उपघातवैराग्यं कतमत् । मैथुनप्रयुक्तस्य दाहविगमे या प्रतिकूलता ।। उपस्तम्भवैराग्यं कतमत् । सुभुक्तवतो मृष्टेऽपि भोजने या प्रतिकूलता ।। समुत्कर्षवैराग्यं कतमत् । उच्चतरं स्थानं प्राप्तवतो निहीने स्थाने या प्रतिकूलता ।। संमोहवैराग्यं कतमत् । बालानां निर्वाणे या प्रतिकूलता ।। प्रतिपक्षवैराग्यं कतमत् । लौकिकेन वा लोकोत्तरेण वा मार्गेण यत्क्लेशप्रहाणम् ।। परिज्ञावैराग्यं कतमत् । प्रतिलब्धदर्शनमार्गस्य त्रैधातुके या प्रतिकूलता ।। प्रहाणवैराग्यं कतमत् । भूमौ भूमौ क्लेशान् प्रजहतो या प्रतिकूलता ।। सोत्तरं वैराग्यं कतमत् । लौकिकानां श्रावकप्रत्येकबुद्धानाञ्च यद्वैराग्यम् ।। निरुत्तरं वैराग्यं कतमत् । यद्बुद्धबोधिसत्त्वानां वैराग्यं सर्वसत्त्वहितसुखाधिष्ठानतामुपादाय ।।

कथं शैक्षं, कति शैक्षाणि, किमर्थं शैक्षपरीक्षा । मोक्षप्रयुक्तस्य कुशलं द्रष्टव्यम् । स्कन्धानां, दशानां धातूनां, चतुर्णां चायतनानां प्रदेशः । मोक्षप्रयुक्तात्माभिनिवेशत्याजनार्थम् ।।

कथमशैक्षं, कत्यशैक्षाणि, किमर्थमशैक्षपरीक्षा । शिक्षायां निष्ठागतस्य कुशलमशैक्षं द्रष्टव्यम् । स्कन्धानां, दशानां धातूनां, चतुर्णां चायतनानां प्रदेशः । मुक्तात्माभिनिवेशत्याजनार्थम् ।।

कथं नैवशैक्षानाशैक्षं, कति नैवशैक्षानाशैक्षाणि, किमर्थं नैवशैक्षानाशैक्षापरीक्षा । पृथग्जनस्य कुशलाकुशलाव्याकृतं, शैक्षस्य क्लिष्टाव्याकृतं, अशैक्षस्य चाऽव्याकृतं, असंस्कृतञ्च । नैवशैक्षानाशैक्षं द्रष्टव्यम् । अष्टौ धातवः, अष्टादशायतनानि, तदन्येषां स्कन्धधात्वायतनानां प्रदेशः । अमुक्तात्माभिनिवेशत्याजनार्थम् ।।

कथं दर्शनप्रहातव्यं, कति (fol. 12b) दर्शनप्रहातव्यानि, किमर्थं दर्शनप्रहातव्यपरीक्षा । परिकल्पिता क्लिष्टा दृष्टिः, विचिकित्सा, दृष्टिस्थानं, ये च दृष्टौ विप्रतिपन्नाः क्लेशोपक्लेशाः, यच्च दृष्ट्या समुत्थापितं कायवाक्कर्म, सर्वं चापायिकं स्कन्धधात्वायतनं दर्शनप्रहातव्यं [द्र]ष्टव्यम् । सर्वेषामेकदेशः । दर्शनसंपन्नात्माभिनिवेशत्याजनार्थम् ।।

कथं भावनाप्रहातव्यं, कति भावनाप्रहातव्यानि, किमर्थं भावनाप्रहातव्यपरीक्षा । लब्धदर्शनमार्गस्य तदूर्ध्वं दर्शनप्रहातव्यविपर्ययेण सास्रवा धर्माः । सर्वेषामेकदेशः । भावनासंपन्नात्माभिनिवेशत्याजनार्थम् ।।

कथं अप्रहातव्यं, कत्यप्रहातव्यानि, किमर्थमप्रहातव्यपरीक्षा । अनास्रवमप्रहातव्यं द्रष्टव्यम् । स्थापयित्वा निर्वेधभागीयं स्कन्धानां, दशानां धातूनां, च[तु]र्णाञ्चायतनानां प्रदेशः । सिद्धात्माभिनिवेशत्याजनार्थम् ।।

कथं प्रतीत्यसमुत्पन्नं, कति प्रतीत्यसमुत्पन्नानि, किमर्थं प्रतीत्यसमुत्पन्नपरीक्षा । लक्षणतोऽपि, अङ्गविभागतोऽपि, अङ्गसमासतोऽपि, अङ्गप्रत्ययत्वव्यवस्थानतोऽपि, अङ्गकर्मव्यवस्थानतोऽपि, अङ्ग-

संक्लेशसंग्रहतोऽपि, अर्थतोऽपि, गाम्भीर्यतोऽपि, प्रभेदतोऽपि, अनुलोम[ प्रतिलोम ]तोऽपि प्रतीत्यसमुत्पन्नं द्र[ ष्ट ]व्यम् । सर्वाणि, धर्मधात्वायतनैकदेशं स्थापयित्वा [ असंस्कृतम् ] । अहेतुविषमहेतुकात्माभिनिवेशत्याजनार्थम् ।। कथं लक्षणतः । निरी[ ह ]प्रत्ययोत्पत्तितामुपादाय, अनित्यप्रत्ययोत्पत्तितामुपादाय, समर्थप्रत्ययोत्पत्तितामुपादाय ।। कथमङ्गविभागतः । द्वादशाङ्गानि, द्वादशाङ्गः प्रतीत्यसमुत्पादः— अविद्या, संस्काराः, विज्ञानं, नामरूपं, षडायतनं, स्पर्शः, वेदना, तृष्णा, उपादानं, भवः, जातिः, जरामरणञ्च ।। कथमङ्गसमासतोऽपि । आक्षेपकाङ्गं, आक्षिप्ताङ्गं, अभिनिर्वर्तकाङ्गं, अभिनिर्वृत्त्यङ्गञ्च ।। आक्षेपकाङ्गं कतमत् । अविद्या, संस्काराः, विज्ञानञ्च ।। आक्षिप्ताङ्गं कतमत् । नामरूपं, षडायतनं, स्पर्शः, वेदना च ।। अभिनिर्वर्तकाङ्गं कतमत् । तृष्णा, उपादानं, भवश्च ।। अभिनिर्वृत्त्यङ्गं कतमत् । जातिः, जरामरणञ्च ।। कथमङ्गप्रत्ययत्वव्यवस्थानतः । वासनतोऽपि, आवेधतोऽपि, मनसिकारतोऽपि, सहभावतोऽप्यङ्गानां प्रत्ययत्वव्यवस्थानं वेदितव्यम् । तच्च यथायोगम् ।। कथमङ्गकर्मव्यवस्थानतः । अविद्या किंकर्मिका । भवे च सत्त्वान् संमोहयति, प्रत्ययश्च भवति संस्काराणाम् ।। संस्काराः किंकर्मकाः । गतिषु च सत्त्वान् विभजन्ति, प्रत्ययाश्च भवन्ति विज्ञानवासनायाः ।। विज्ञानं किंकर्मकम् । सत्त्वानां कर्मबन्धञ्च धारयति, प्रत्ययश्च भवति नामरूपस्य ।। नामरूपं किंकर्मकम् । आत्मभावं च सत्त्वान् ग्राहयति, प्रत्ययश्च भवति षडायतनस्य ।। षडायतनं किंकर्मकम् । आत्मभावपरिपूरिञ्च सत्त्वान् ग्राहयति, प्रत्य-(fol. 13a) यश्च भवति स्पर्शस्य ।। स्पर्शः किंकर्मकः । विषयोपभोगे च सत्त्वान् प्रवर्तयति, प्रत्ययश्च भवति वेदनायाः ।। वेदना किंकर्मिका । जन्मोपभोगे च सत्त्वान् प्रवर्तयति, प्रत्ययश्च भवति तृष्णायाः ।। तृष्णा किंकर्मिका । जन्मनि च सत्त्वानाकर्षयति, प्रत्ययश्च भवति उपादानस्य ।। उपादानं किंकर्मकम् । पुनर्भवादानाञ्च सोपादानं च सत्त्वानां विज्ञानं करोति, प्रत्ययश्च भवति भवस्य ।। भवः किंकर्मकः । पुनर्भवे च सत्त्वानभिमुखीकरोति, प्रत्ययश्च भवति जातेः ।। जातिः किंकर्मिका । नामरूपषडायतनस्पर्शवेदनानुपूर्व्या च सत्त्वानभिनिर्वर्तयति, प्रत्ययश्च भवति जरामरणस्य ।। जरामरणं किंकर्मकम् । पुनःपुनर्वयःपरिणामेन जीवितपरिणामेन च सत्त्वान्योजयति ।। कथमङ्गसंक्लेशसंग्रहतः । या चाऽविद्या, या च तृष्णा, यच्चोपादानमित्ययं संक्लेशसंग्रहः ।। कथमर्थतः । निःकर्तृकार्थः प्रतीत्यसमुत्पादार्थः, सहेतुकार्थः, निःसत्त्वार्थः, परतन्त्रार्थः निरीहकार्थः, अनित्यार्थः, क्षणिकार्थः, हेतुफलप्रबन्धानुपच्छेदार्थः, अनुरूपहेतुफलार्थः, [ नानाहेतुफलार्थः,] प्रतिनियतहेतुफलार्थश्च प्रतीत्यसमुत्पादः ।। कथं गाम्भीर्यतः । हेतुगाम्भीर्यतोऽपि, लक्षणगाम्भीर्यतोऽपि, उत्पत्तिगाम्भीर्यतोऽपि, स्थितिगाम्भीर्यतोऽपि, वृत्तिगाम्भीर्यतोऽपि गाम्भीर्यं द्रष्टव्यम् ।। अपि खलु क्षणिकः प्रतीत्यसमुत्पादः, स्थितिश्चोपलभ्यते । निरीहकप्रत्ययः प्रतीत्यसमुत्पादः, समर्थप्रत्ययश्चोपलभ्यते । निःसत्त्वः प्रतीत्यसमुत्पादः, सत्त्वतश्चोपलभ्यते । निष्कर्तृकः प्रतीत्यसमुत्पादः, कर्मफलाविप्रणाशश्चोपलभ्यते । न स्वतो न परतो न द्वाभ्यां न स्वयंका[ रपर ]काराहेतुसमुत्पन्नः । अतोऽपि गम्भीरः ।। कथं प्रभेदतः । विज्ञानोत्पत्तिप्रभेदतः, च्युत्युपपत्तिप्रभेदतः, बाह्यशस्योत्पत्तिप्रभेदतः, संवर्तविवर्तप्रभेदतः, आहारोपस्तम्भप्रभेदतः, इष्टानिष्टगतिविभागप्रभेदतः, विशुद्धिप्रभेदतः, प्रभावप्रभेदतश्च प्रभेदो द्रष्टव्यः ।। कथमनुलोमप्रतिलोमतः । संक्लेशानुलोमप्रतिलोमतोऽपि, व्यवदानानुलोमप्रतिलोमतोऽपि प्रतीत्यसमुत्पादस्याऽनुलोमप्रतिलोमनिर्देशो द्रष्टव्यः ।।



कथं प्रत्ययः, कति प्रत्ययाः, किमर्थं प्रत्ययपरीक्षा । हेतुतोऽपि, समनन्तरतोऽपि, आलम्बनतोऽपि अधिपतितोऽपि प्रत्ययो द्रष्टव्यः । सर्वाणि प्रत्ययः । आत्महेतुकधर्माभिनिवेशत्याजनार्थम् ।। हेतुप्रत्ययः कतमः । आलयविज्ञानं कुशलवासना च । अपि खलु स्वभावतोऽपि, प्रभेदतोऽपि, सहायतोऽपि, संप्रतिपत्तितोऽपि, पुष्टितोऽपि, परिपन्थतोऽपि, परिग्रहतोऽपि हेतुप्रत्ययो (fol. 13b) द्रष्टव्यः ।। कथं स्वभावतः । कारणं, हेतुस्वभावतः ।। कथं प्रभेदतः । [ कारणं, हेतुप्रभेदतः । तच्च संक्षेपेण विंशतिप्रकारकम् । ] उत्पत्तिकारणं, तद्यथा [ विज्ञानं ] सामग्री विज्ञानस्य । स्थितिकारणं, तद्यथा आहारो भूतानां सत्त्वानां संभवैषिणाञ्च । धृतिकारणं, तद्यथा पृथिवी सत्त्वानाम् । प्रकाशनकारणं, तद्यथा प्रदीपो रूपाणाम् । विकारकारणं, तद्यथाऽग्निरिन्धनस्य । वियोगकारणं, तद्यथा दात्रं छेद्यस्य । परिणतिकारणं, तद्यथा शिल्पस्थानादिकं हिरण्यादीनाम् । संप्रत्ययकारणं, तद्यथा धूमोऽग्नेः । संप्रत्यायनकारणं, तद्यथा प्रतिज्ञाहेतुदृष्टान्ताः साध्यस्य । संप्रापणकारणं, तद्यथा मार्गो निर्वाणस्य । व्यवहारकारणं, तद्यथा नाम संज्ञा दृष्टिश्च । अपेक्षाकारणं, यदपेक्ष्य यत्रार्थित्वमुत्पद्यते तद्यथा जिघत्सामपेक्ष्य भोजने । [ आक्षेप ]कारणं, विदूरः प्रत्ययः, तद्यथाऽविद्या जरामरणस्य । अभिनिर्वृत्तिकारणं, आसन्नः प्रत्ययः, तद्यथाऽविद्या संस्काराणाम् । परिग्रहकारणं, तदन्यः प्रत्ययः, तद्यथा क्षेत्रोदकपाष्यादिकं सस्योदयस्य । आवाहककारणं, अनुकूलतः प्रत्ययः, तद्यथा सम्यग्राजासेवा राजाराधनायाः । प्रतिनियमकारणं, प्रत्ययवैचित्र्यं, तद्यथा पञ्चगतिप्रत्ययाः पञ्चानां गतीनाम् । सहकारिकारणं, प्रत्ययसामग्री, तद्यथा विज्ञानस्येन्द्रियमपरिभिन्नं विषय आभासगतस्तज्जश्च मनस्कारः प्रत्युपस्थितः । विरोधिकारणं, अन्तरायः, तद्यथा सस्यस्याऽशनिः । अविरोधकारणं, अ[ न ]न्तरायः, तद्यथा तस्यैवान्तरायस्याऽभावः ।। कथं सहायतः । ये धर्माः सहभावेनोत्पद्यन्ते नाऽन्यतमवैकल्येन, तद्यथा भूतानि भौतिकञ्च [ यथायोगम् ] ।। कथं संप्रतिपत्तितः । ये धर्माः स[ ह ]भावेनालम्बनं संप्रतिपद्यन्ते नाऽन्यतमवैकल्येन, तद्यथा चित्तं चैतसिकाश्च ।। कथं पुष्टितः । पूर्वभावितानां कुशलाकुशलाव्याकृतानां धर्माणां याऽपरान्त उत्तरोत्तरा पुष्टतरा पुष्टतमा प्रवृत्तिः ।। कथं परिपन्थतः, या क्लेशानामन्यतमभावनयाऽन्यतमप्रबन्धपुष्टिदृढीकारः, निर्वाणसंतानदूरीकरणाय ।। कथं परिग्रहतः । अकुशलाः कुशलसास्रवाश्च धर्मा आत्मभावपरिग्रहाय ।। कथं समनन्तरतः । नैरन्तर्यसमनन्तरतोऽपि, सभागविसभागचित्तचैत्तोत्पत्तिसमनन्तरतोऽपि समनन्तरप्रत्ययो द्रष्टव्यः ।। कथमालम्बनतः । परिच्छिन्नविषयालम्बनतोऽपि, अपरिच्छिन्नविषयालम्बनतोऽपि, अचित्रीकारविषयालम्बनतोऽपि, [ सचित्रीकारविषयालम्बनतोऽपि,] सवस्तुकविषयाल[ म्ब ]नतोऽपि, अवस्तुकविषयालम्बनतोऽपि, वस्त्वालम्बनतोऽपि, परिकल्पालम्बनतोऽपि, विपर्यस्तालम्बनतोऽपि, अविपर्यस्तालम्बनतोऽपि, सव्याघातालम्बनतोऽपि, अव्याघातालम्बनतोऽप्यालम्बनप्रत्ययो द्रष्टव्यः ।। कथमधिपतितः । प्रतिष्ठाधिपतितोऽपि, आवेधाधिपतितोऽपि, सहभावाधिप-(fol. 14a) तितोऽपि, विषयाधिपतितोऽपि, प्रसवाधिपतितोऽपि, स्थानाधिपतितोऽपि, फलोपभोगाधिपतितोऽपि, लौकिकविशुद्ध्याधिपतितोऽपि, लोकोत्तरविशुद्ध्याधिपतितोऽप्यधिपतिप्रत्ययो द्रष्टव्यः ।।

कथं सभागतत्सभागं, कति सभागतत्सभागानि, किमर्थं सभागतत्सभागपरीक्षा । विज्ञानविरहिततत्सादृश्येन्द्रियविषयप्रबन्धोत्पत्तितोऽपि, विज्ञानविरहितस्वसादृश्यप्रबन्धोत्पत्तितोऽपि सभागतत्-

सभागं द्रष्टव्यम्। रूपस्कन्धैकदेशः, पञ्च रूपीणि धात्वायतनानि। विज्ञानयुक्तायुक्तात्माभिनिवेशत्याजनार्थम्॥

कथमुपात्तं, कत्युपात्तानि, किमर्थमुपात्तपरीक्षा। वेदनोत्पत्त्याश्रय[रूप]त उपात्तं द्रष्टव्यम्। रूपस्कन्धैकदेशः, पञ्च रूपीणि धात्वायतनानि, चतुर्णां चैकदेशः। देहवशवर्त्यात्माभिनिवेशत्याजनार्थम्॥

कथमिन्द्रियं, कतीन्द्रियाणि, किमर्थमिन्द्रियपरीक्षा। विषयग्रहणाधिपतितोऽपि, कुलप्रबन्धाधिपतितोऽपि, निकायसभागस्थानाधिपतितोऽपि, शुभाशुभकर्मफलोपभोगाधिपतितोऽपि, लौकिकवैराग्याधिपतितोऽपि, लोकोत्तरवैराग्याधिपतितोऽपीन्द्रियं द्रष्टव्यम्। वेदनास्कन्धः, विज्ञानस्कन्धः, रूपसंस्कारस्कन्धैकदेशः, द्वादश धातवः, षडायतनानि, धर्मधात्वायतनैकदेशश्च। आत्माधिपत्याभिनिवेशत्याजनार्थम्॥

कथं दुःखदुःखता, कति दुःखदुःखतानि, किमर्थं दुःखदुःखतापरीक्षा। दुःखवेदनास्वलक्षणतोऽपि, दुःखवेदनीयधर्मस्वलक्षणतोऽपि दुःखदुःखता द्रष्टव्या। सर्वेषामेकदेशः। दुःखितात्माभिनिवेशत्याजनार्थम्॥

कथं विपरिणामदुःखता, कति विपरिणामदुःखतानि, किमर्थं विपरिणामदुःखतापरीक्षा। सुखवेदनाविपरिणतिस्वलक्षणतोऽपि, सुखवेदनीयधर्मविपरिणतिस्वलक्षणतोऽपि तत्र चाऽनुनयचित्तविपरिणतितोऽपि विपरिणामदुःखता द्रष्टव्या। सर्वेषामेकदेशः। सुखितात्माभिनिवेशत्याजनार्थम्॥

कथं संस्कारदुःखता, कति संस्कारदुःखतानि, किमर्थं संस्कारदुःखतापरीक्षा। अदुःखासुखवेदनास्वलक्षणतोऽपि, अदुःखासुखवेदनीयधर्मस्वलक्षणतोऽपि, तदुभयदौष्ठुल्यपरिग्रहतोऽपि, द्वयाविनिर्मोक्षानित्यानुबन्धायोगक्षेमतोऽपि संस्कारदुःखता द्रष्टव्या। स्कन्धानां, त्रयाणां धातूनां, द्वयोश्चायतनयोरेकदेशं स्थापयित्वा सर्वाणि। अदुःखासुखात्माभिनिवेशत्याजनार्थम्॥

कथं सविपाकं, कति सविपाकानि, किमर्थं सविपाकपरीक्षा। अकुशलं, कुशलसास्रवञ्च सविपाकं द्रष्टव्यम्। स्कन्धानां, दशानां धातूनां, चतुर्णां चायतनानामेकदेशः। स्कन्धोपनिक्षेपकप्रतिसंधायकात्माभिनिवेशत्याजनार्थम्॥ (fol. 14b) विपाकः पुनरालयविज्ञानं ससंप्रयोगं द्रष्टव्यम् तदन्यच्च विपाकजम्॥

कथमाहारः, कत्याहाराः, किमर्थमाहारपरीक्षा। परिणतितोऽपि परिणामिकः, विषयतोऽपि वैषयिकः, आशयतोऽप्याशिकः, उपादानतोप्युपादानिक आहारो द्रष्टव्यः। त्रयाणां स्कन्धानां, एकादशानां धातूनां, पञ्चानां चायतनानामेकदेशः। आहारस्थितिकात्माभिनिवेशत्याजनार्थम्॥ अपि खलु आहारोऽशुद्धाश्रयस्थितिकः, शुद्धाशुद्धाश्रयस्थितिकः, शुद्धाश्रयस्थितिकः, स्थितिसांदर्शनिकश्च द्रष्टव्यः॥

कथं सोत्तरं, कति सोत्तराणि, किमर्थं सोत्तरपरीक्षा। संस्कृततोऽसंस्कृतैकदेशतश्च सोत्तरं द्रष्टव्यम्। धर्मधात्वायतनैकदेशं स्थापयित्वा सर्वाणि। आत्मद्रव्यहीनाभिनिवेशत्याजनार्थम्॥

कथमनुत्तरं, कत्यनुत्तराणि, किमर्थमनुत्तरपरीक्षा। असंस्कृतैकदेशतोऽनुत्तरं द्रष्टव्यम्। धर्मधात्वायतनैकदेशः। आत्मद्रव्याग्राभिनिवेशत्याजनार्थम्॥



इत्यनेन नयेनाऽप्रमाणः प्रभेदनयः॥ अपि खलु समासतः स्कन्धधात्वायतनानां प्रभेदस्त्रिविधः, परिकल्पितलक्षणप्रभेदः, विकल्पितलक्षणप्रभेदः, धर्मतालक्षणप्रभेदश्च॥ तत्र परिकल्पितलक्षणप्रभेदः कतमः। स्कन्धधात्वायतनेष्वात्मेति वा सत्त्वो जीवो जन्तुः पोषः पुद्गलो मनुजो मानव इति वा यत्परिकल्प्यते॥ विकल्पितलक्षणप्रभेदः कतमः। तान्येव स्कन्धधात्वायतनानि॥ धर्मतालक्षणप्रभेदः कतमः। तेष्वेव स्कन्धधात्वायतनेष्वात्माभावः, सत्त्वजीवजन्तुपोषपुद्गलमनुजमानवाभावः, नैरात्म्यास्तिता॥ अपि तु खलु चतुर्विधः प्रभेदः, स्वलक्षणप्रभेदः, प्रकार[प्र]प्रभेदः, आश्रयप्रभेदः, संततिप्रभेदश्च॥ लक्षणप्रभेदः कतमः। प्रत्येकं स्कन्धधात्वायतनानां स्वलक्षणप्रभेदः॥ प्रकार[प्र]भेदः कतमः। तेषामेव स्कन्धधात्वायतनानां द्रव्यसन्तः, प्रज्ञप्तिसन्तः, संवृतिसन्तः, परमार्थसन्तः, रूपिणः, अरूपिणः, सनिदर्शनाः, अनिदर्शना इत्येवमादि यथानिर्दिष्टः॥ आश्रयप्रभेदः कतमः। यावन्तः सत्त्वाश्रयास्तावन्ति स्कन्धधात्वायतनानि॥ संततिप्रभेदः कतमः। प्रतिक्षणं स्कन्धधात्वायतनानां प्रवृत्तिः॥ लक्षणप्रभेदे कुशलः किं परिजानाति, आत्माभिनिवेशं परिजानाति॥ प्रकारप्रभेदे कुशलः किं परिजानाति, पिण्डसंज्ञां परिजानाति॥ आश्रयप्रभेदे कुशलः किं परिजानाति, अकृताभ्यागमकृतविप्रणाशसंज्ञां परिजानाति॥ संततिप्रभेदे कुशलः किं परिजानाति, स्थिरसंज्ञां परिजानाति॥ अपि खलु षड्विधः प्रभेद एषामेव स्कन्धधात्वायतनानां, बहिर्मुखप्रभेदः, अन्तर्मुखप्रभेदः, आय[तका]लप्रभेदः, परिच्छिन्नकालप्रभेदः, तत्कालप्रभेदः, संदर्शनप्रभेदश्च॥ बहिर्मु[खप्रभेदः कतमः।]

(*Lacuna :* Skt. 15 ; Tib. 75b$^{7}$–78a$^{2}$ ; 672c$^{13}$–673b$^{15}$)

## C

(fol. 16a) सभागधातुभूमिकयोरविसभाग[धातु]भूमिकयोः॥ सर्वत्रगसंप्रयोगः, तद्यथा वेदनासंज्ञा चेतनास्पर्शमनस्कारविज्ञानानाम्॥ अपि खलु क्लिष्टसर्वत्रगः संप्रयोगो मनसि चतुर्णां क्लेशानाम्॥ कदाचित्कः संप्रयोगः, तद्यथा चित्ते श्रद्धादीनां कुशलानां रागादीनां च क्लेशोपक्लेशानाम्॥ आवस्थिकः संप्रयोगः सुखाया वेदनायाः ससंप्रयोगायाः, एवं दुःखाया अदुःखासुखायाः॥ अविच्छिन्नः संप्रयोगः सचि[त्त]कायामवस्थायाम्॥ विच्छिन्नः संप्रयोगोऽचित्तिकसमापत्त्यन्तरितस्य॥ बहिर्मुखः संप्रयोगो यद्भूयसा कामप्रतिसंयुक्तानां चित्तचैतसिकानाम्॥ अन्तर्मुखः संप्रयोगो यद्भूयसा समाहितभूमिकानां चित्तचैतसिकानाम्॥ उचितः संप्रयोगः पार्थग्जनिकानां चित्तचैतसिकानां तदेकत्यानां च शैक्षाशैक्षाणाम्॥ अनुचितः संप्रयोगो लोकोत्तराणां चित्तचैतसिकानामाद्यतदुत्तराणां लोकोत्तरपृष्ठलब्धानां च॥ संप्रयोगकुशलः कमनुशंसं प्रतिलभते। चित्तमात्रे वेदनादीनां सांक्लेशिकानां व्यावदानिकानाञ्च धर्माणां संप्रयोगं विप्रयोगं जानाति, तच्च जानन्नात्मा वेदयते, संजानाति, चेतयते, स्मरति, संक्लिशति, व्यवदायते [चेत्य]भिनिवेशं प्रजहाति, नैरात्म्यमवतरति॥

समन्वागमः कतमः। लक्षणतः पूर्ववत्। प्रभेदः पुनस्त्रिविधः, बीजसमन्वागमः, वशितासमन्वागमः, समुदाचारसमन्वागमश्च॥ बीजसमन्वागमः कतमः। कामधातौ जातोभूतः कामप्रतिसंयुक्तैः क्लेशोपक्लेशैः, रूपारूप्यप्रतिसंयुक्तैश्च क्लेशोपक्लेशैः, बीजसमन्वागमेन समन्वागत

उपपत्तिलाभिकैश्च कुशलैः। रूपधातौ जातोभूतः कामप्रतिसंयुक्तैः क्लेशोपक्लेशैर्बीजसमन्वागमेन समन्वागतोऽसमन्वागतश्च वक्तव्यो रूपप्रतिसंयुक्तैरारूप्यप्रतिसंयुक्तैश्च क्लेशोपक्लेशैर्बीजसमन्वागमेन समन्वागत उपपत्तिलाभिकैश्च कुशलैः। आरूप्यधातौ जातोभूतः कामप्रतिसंयुक्तै रूपप्रतिसं[ यु ]क्तैश्च क्लेशोपक्लेशैर्बीजसमन्वागमेन समन्वा[ ग ]तोऽसमन्वागतश्च वक्तव्य आरूप्यप्रतिसं[ यु ]क्तैः क्लेशोपक्लेशैर्बीजसमन्वागमेन समन्वागत उपपत्तिलाभिकैश्च कुशलैः॥ त्रैधातुकप्रतिपक्षलाभी यस्य यस्य प्रकारस्य प्रतिपक्ष उत्पन्नस्तस्य बीजसमन्वागमेनासमन्वागतः, यस्य प्रतिपक्षो नोत्पन्नस्तस्य बीजसमन्वागमेन समन्वागतः॥ वशितासमन्वागमः कतमः। प्रायोगिकानां कुशलानां धर्माणां वशितासमन्वागमेन समन्वागतः, लौकिकानां लोकोत्तराणां वा ध्यानविमोक्षस-(fol. 16b) माधिस[ मा ]पत्त्यादीनां तदेकत्यानां [ अ ]व्याकृतानाम्॥ समुदाचारसमन्वागमः कतमः। स्कन्धधात्वायतनानां यो य एव धर्मः संमुखीभूतः कुशलो वाऽकुशलो वाऽव्याकृतो वा, तस्य समुदाचारसमन्वागमेन समन्वागतः, समुच्छिन्नकुशलमूलः कुशलानां धर्माणां बीजसमन्वागमेन समन्वागतोऽसमन्वागतश्च वक्तव्यः। आत्यन्तिकः पुनः संक्लेशसमन्वागमोऽपरिनिर्वाणधर्मकानामिच्छन्तिकानां द्रष्टव्यः, मोक्षहेतुवैकल्यादात्यन्तिक एषां हेत्वसमन्वागमः॥ समन्वागमकुशलः कमनुशंसं प्रतिलभते। आचयापचयज्ञो भवति धर्माणाम्। तथा आचयापचयज्ञो न कस्यांचिल्लौकिक्यां संपत्तौ विपत्तौ वा एकान्तिकसंज्ञी भवति, यावदेवाऽनुनयप्रतिघप्रहाणाय॥

## अभिधर्मसमुच्चये लक्षणसमुच्चयो नाम प्रथमः समुच्चयः॥

विनिश्चयः कतमः। सत्यविनिश्चयः, धर्मविनिश्चयः, प्राप्तिविनिश्चयः, सांकथ्यविनिश्चयश्च॥

सत्यविनिश्चयश्च कतमः। चत्वार्यार्यसत्यानि— दुःखं, समुदयः, निरोधः, मार्गश्च॥

दुःखसत्यं कतमत्। तत्सत्त्वजन्मतो जन्माधिष्ठानतश्च वेदितव्यम्॥ सत्त्वजन्म कतमत्। [ सत्त्वजन्म नरक ]तिर्यक्प्रेतेषु; मनुष्येषु पूर्वविदेहेषु, अपरगोदानीयेषु, जाम्बूद्वीपेषु, उत्तरेषु कुरुषु; देवेषु चतुर्महाराजकायिकेषु, त्रायस्त्रिंशेषु, यामेषु, तुषितेषु, निर्माणरतिषु, परनिर्मितवशवर्तिषु, ब्रह्मकायिकेषु, ब्रह्मपुरोहितेषु, महाब्रह्मेषु, परीत्ताभेषु, [अप्रमाणाभेषु, आभास्वरेषु परीत्तशुभेषु,] अप्रमाणशुभेषु, शुभकृत्स्नेषु, अनभ्रकेषु, पुण्यप्रसवेषु, बृहत्फलेषु, असंज्ञिसत्त्वेषु, अवृहेषु, अतपेषु, सुदृशेषु, सुदर्शनेषु, अकनिष्ठेषु, आकाशानन्त्यायतनेषु, विज्ञानानन्त्यायतनेषु, आकिञ्चन्यायतनेषु, नैवसंज्ञानासंज्ञायतनेषु॥ जन्माधिष्ठानं कतमत्। भाजनलोकः। वायुमण्डले अब्मण्डलं प्रतिष्ठितं; अब्मण्डले पृथिवीमण्डलं; पृथिवीमण्डले सुमे[ रुः ], सप्तकाञ्चनपर्वताः, चत्वारो द्वीपाः, अष्टावन्तरद्वीपाः, अभ्यन्तरः समुद्रः, बाह्यसमुद्रः, चतस्रः सुमेरुपरिषण्णाः, चतुर्महाराजकायिकानां त्रायस्त्रिंशानां स्थानान्तराणि, चक्रवाडः पर्वतः, आकाशे विमानानि यामानां तुषितानां निर्माणरतीनां परनिर्मितवशवर्तिनां देवानां रूपावचराणाञ्च; असुराणां स्थानान्तराणि; नारकाणां स्थानान्तराणि, उष्णनरकाः शीतनरकाः प्रत्येकनरकाश्च; तदेकत्यानाञ्च तिर्यक्प्रेतानां स्थानान्तराणि; यावदादित्याः परिचरन्तो दिशोऽवभासयन्ते। वैरोचनास्तावत्साहस्रके लोके सहस्रं चन्द्राणां सहस्रं सूर्याणां सहस्रं सुमेरूणां पर्वतराजानां—



(*Lacuna :* Skt. 17-18 ; Tib. 80a$^{3}$—83b$^{3}$ ; Chin. 674a$^{27}$—675b$^{14}$)

D

(fol. 19a) उत्पन्नस्य चाऽनपेक्ष्य प्रत्ययं स्वरसविनाशितामुपादाय रूपस्याऽपि क्षणिकता द्रष्टव्या॥

यदुक्तं— यत्किञ्चिद्रूपं सर्वं तच्चत्वारि महाभूतानि, चत्वारि च महाभूतान्युपादायेति, तत्किं संधायोक्तम्। संभवं संधायोक्तम्। एकदेशाश्रयी भावार्थ उपादायार्थः। यत्र पुनः समुदये यद्भूतमुपलभ्यते, तत्तत्राऽस्तीति वक्तव्यं, अस्ति यावत्सर्वभौतिकम्। उपादाय[ रू ]पेऽपि, यदुपादायरूपं यस्मिन्समुदाय उपलभ्यत तत्तत्राऽस्तीति वेदितव्यम्॥

यत्पुनरुच्यते— परमाणुसंचितो रूपसमुदाय इति, तत्र निःशरीरः परमाणुर्वेदितव्यः। बुद्ध्यापर्यन्तप्रभेदतस्तु परमाणुव्यवस्थानं पिण्डसंज्ञाविभावनतामुपादाय, रूपे द्रव्यापरिनिष्पत्तिप्रवेशताञ्चोपादाय॥

तत्पुनरेतद्दुःखमस्ति विपुलमसंलिखितं, संलिखितं, संलिखितासंलिखितञ्च, अस्ति मध्यमसंलिखितं, अस्ति तनुकमसंलिखितं, अस्ति तनुतरं संलिखितं, अस्ति तनुतमं संलिखितं, अस्त्यदुःखंदुःखप्र[ ति ]भासं महासंलेखप्रत्युपस्थानञ्च॥ कतमद्विपुलं दुःखमसंलिखितं, यत्कामावचरमनुपचितकुशलमूलानाम्। कतमत्संलिखितं, तदेवोत्पन्नमोक्षभागीयानाम्। कतमत्संलिखितासंलिखितं, तदेव लौकिकवैराग्यायाऽवरोपितकुशलमूलानाम्। कतमन्मध्यमसंलिखितं, रूपधातूपपन्नानां विवर्जितमोक्षभागीयानाम्। कतमत्तनुकमसंलिखितं, आरूप्योपपन्नानां विवर्जितमोक्षभागीयानाम्। कतमत्तनुतरं संलिखितं, यच्छैक्षाणाम्। कतमत्तनुतमं संलिखितं, यदशैक्षाणां जीवितेन्द्रियप्रत्ययं षडायतनम्। कतमददुःखं दुःखप्रतिभासं महासंलेखप्रत्युपस्थानं, यत्पारमिप्राप्तानां बोधिसत्त्वानां संचिन्त्य भवोपपत्तिषु॥ यदुक्तं— मरणं दुःखमिति, तत्र मरणं त्रिविधं, कुशलचित्तस्याऽकुशलचित्तस्याऽव्याकृतचित्तस्य च। पटुके चित्तप्र[ चा ]रे, स्वकुशलमूलबलाधान[ तो ] वा परोपसंहारतो वा कुशलचित्तस्य मरणं द्रष्टव्यम्। पटुक एव चित्तप्र[ चा ]रे, स्वाकुशलमूलावधानतो वा परोपसंहारतो वाऽकुशलचित्तस्य मरणं द्रष्टव्यम्। पटुके वा चित्तप्र[ चा ]रेऽपटुके वा, तदुभयवै-(fol. 19b) कल्यादभिसंस्कारासमर्थस्य वाऽव्याकृतचित्तस्य मरणं द्रष्टव्यम्॥

शुभकारिणोऽधःकायस्तत्प्रथमतः शीतीभवति, अशुभकारिणः पुन ऊर्ध्वकायः शीतीभवति। तत्राऽशुभकारिणोऽन्तराभवोऽभिनिर्वर्तते, तद्यथा कृष्णस्य कुतपस्य निर्भासोऽन्धकारतमिस्रा या वा रात्र्याः। शुभकारिणस्तद्यथा शुक्लस्य पटस्य निर्भासः, सज्योत्स्नाया वा रात्र्याः। अन्तराभवः कामधातौ रूपधातौ चोपपद्यमानस्याऽरूप्यधातोश्च च्यवमानस्य। स च मनोमयो गन्धर्व इत्यपि। परं सप्ताहं तिष्ठत्यन्तरेण च च्यवते, एकदा च व्यावर्तते, तत्रस्थश्च कर्मोपचिनोति, सभागांश्च सत्त्वान्पश्यति। यत्र चोपपद्यते तदाकृतिरप्रतिहतगतिश्च। ऋद्धिमानिव चाशुगामी उपपत्त्यायतने प्रतिहन्यते, उपपत्त्यायतने तुलावनामोन्नामयोगेन च्यवते प्रतिसंधिञ्चाबध्नाति। अन्तराभवस्थश्चोपपत्त्यायतने रागमुत्पादयति, तदन्यश्च क्लेशः प्रत्ययो भवति। सह रागेणाऽन्तराभवो निरुध्यते, कललञ्च सविज्ञानकमुत्पद्यते, स च विपाकः। तत ऊर्ध्वमिन्द्रियाभिनिर्वृत्तिः, यथा प्रतीत्यसमुत्पादे चतसृषु योनिषु— अण्डजायां, जरायुजायां, संस्वेदजायां, उपपादुकायाञ्च॥

समुदयसत्यं कतमत्। क्लेशः क्लेशाधिपतेयञ्च कर्म ॥ प्राधान्यनिर्देशस्तु भगवता तृष्णा पौनर्भविकी नन्दीरागसहगता तत्रतत्राभिनन्दिनी समुदयसत्यनिर्देशेन निर्दिष्टा ॥ प्राधान्यार्थः कतमः, यः सर्वत्रगार्थः। सर्वत्रगार्थः कतमः, तथाहि तृष्णा वस्तुसर्वत्रगा, अवस्थासर्वत्रगा, अध्वसर्वत्रगा, धातुसर्वत्रगा, एषणासर्वत्रगा, प्रकारसर्वत्रगा ॥ क्लेशः कतमः, परिसंख्यानतोऽपि, लक्षणतोऽपि, उत्थानतोऽपि, आलम्बनतोऽपि, संप्रयोगतोऽपि, पर्यायतोऽपि, विप्रतिपत्तितोऽपि, धातुतोऽपि, निकायतोऽपि प्रहाणतोऽपि, क्लेशो द्रष्टव्यः ॥ परिसंख्यानं कतमत्, षट् क्लेशा दश वा। षट् क्लेशाः कतमे, रागः प्रतिघो मानोऽविद्या विचिकित्सा दृष्टिश्च। त एव दृष्टेः पञ्चाकारभेदेन दश भवन्ति ॥ लक्षणं कतमत्, यो धर्म उत्पद्यमानोऽप्रशान्तलक्षण उत्पद्य[ते, येनोत्पन्नेन कायचित्तसंतानाऽप्रशान्तिः प्रवर्तते, तत्क्लेशलक्षणम् ॥ ]

(*Lacuna :* Skt. 20–29 ; Tib. 85a[5]–102a[2] ; Chin. 676b[3]–683a[26])

E

(fol. 30a) [ उ ]पादाय ॥

भावनामार्गः कतमः। दर्शनमार्गादूर्ध्वं लौकिको मार्गः, लोकोत्तरो मार्गः, मृदुर्मार्गः, मध्यो मार्गः, अधिमात्रो मार्गः, प्रयोगमार्गः, आनन्तर्यमार्गः, विमुक्तिमार्गः, विशेषमार्गश्च ॥

लौकिको मार्गः कतमः। लौकिकं प्रथमं ध्यानं, द्वितीयं ध्यानं, तृतीयं, चतुर्थं ध्यानं, आकाशानन्त्यायतनं, विज्ञानानन्त्यायतनं, आकिञ्चन्यायतनं, नैवसंज्ञानासंज्ञायतनञ्च। त एते ध्याना [ आ ]रूप्याः संक्लेशव्यवदानव्यवस्थानविशुद्धिभिर्वेदितव्याः ॥ कथं संक्लेशतः। चत्वार्यव्याकृतमूलानि, तृष्णा, दृष्टिः, मानः, अविद्या च। तृष्णया आस्वादसंक्लेशेन संक्लिश्यते। दृष्ट्या दृष्ट्युत्तरध्यायितया संक्लिश्यते। मानेन मानोत्तरध्यायितया संक्लिश्यते। अविद्यया विचिकित्सोत्तरध्यायितया संक्लिश्यते। तथा च संक्लिष्टचेतसां रूपारूप्यावचराः क्लेशोपक्लेशाः प्रवर्तन्ते ॥ कथं व्यवदानतः। शुद्धका ध्याना [ आ ]रूप्याः कुशलत्वाद् व्यवदाता इत्युच्यन्ते ॥ कथं व्यवस्थानतः। अङ्गव्यवस्थानतः, समापत्तिव्यवस्थानतः, मात्राव्यवस्थानतः, संज्ञाकरणव्यवस्थानतश्च। कथमङ्गव्यवस्थानतः। प्रथमं ध्यानं पञ्चाङ्गं, पञ्चाङ्गानि— वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रता च। द्वितीयं ध्यानं चतुरङ्गं, चत्वार्यङ्गानि— अध्यात्मसंप्रसादः प्रीतिः सुखं चित्तैकाग्रता च। तृतीयं ध्यानं पञ्चाङ्गं, पञ्चाङ्गानि— उपेक्षा स्मृतिः संप्रजन्यं सुखं चित्तैकाग्रता च। चतुर्थं ध्यानं चतुरंगं, चत्वार्यङ्गानि— उपेक्षापरिशुद्धिः स्मृतिपरिशुद्धिरदुःखासुखा वेदना चित्तैकाग्रता च। प्रतिपक्षाङ्गमुपादाय, अनुशंसाङ्गमुपादाय, तदुभयाश्रयस्वभावाङ्गं चोपादाय। आरूप्येष्वङ्गव्यवस्थानं नाऽस्ति, शमथैकरसतामुपादाय ॥ कथं समापत्तिव्यवस्थानतः। सप्तभिर्मनस्कारैः प्रथमं ध्यानं समापद्यते, एवं यावन्नैवसंज्ञानासंज्ञायतनञ्च। सप्त मनस्काराः कतमे, लक्षणप्रति-(fol. 30b) संवेदी मनस्कार आधिमोक्षिकः प्रावि[ विक्तो ] रतिसंग्राहको मीमांसकः प्रयोगनिष्ठः प्रयोगनिष्ठाफलश्च मनस्कारः ॥ कथं मात्राव्यवस्थानतः। प्रथमं ध्यानं मृदुपरिभावितं, मध्यपरिभावितं, अधिमात्रपरिभावितञ्च, [ यथा ] प्रथमं ध्यानमेवं शिष्टानि ध्यानान्यारूप्याश्च, मृदुमध्याधिमात्रपरिभावितस्य



प्रथमस्य ध्यानस्य फलं त्रिविधा प्रथमध्यानोपपत्तिः, यथा प्रथमस्य ध्यानस्य एवमवशिष्टानां ध्यानानां त्रिविधा ध्यानोत्पत्तिः, आरूप्येषु स्थानान्तराभावमुपादायोपपत्तिभेदो नाऽस्ति, तत्र मृदुमध्याधिमात्रपरिभावितत्वात् आरूप्याणामुपपत्तावुच्चनीचता हीनप्रणीतता प्रज्ञायते ॥ कथं संज्ञाकरणव्यवस्थानतः। प्रथमध्यानसंगृहीतान्यावतः समाधीन्बुद्धबोधिसत्त्वाः समापद्यन्ते तेषां श्रावकप्रत्येकबुद्धा नामाभिज्ञाऽपि [ न ] भवन्ति, यथा प्रथमध्यानसंगृहीतानेवमवशिष्टध्यानारूप्यसंगृहीतान्, यदुत ध्यानपारमितान्निश्रित्य ॥ कथं विशुद्धितः। प्रान्तकोटिकं प्रथमं ध्यानं यावन्नैवसंज्ञानासंज्ञायतनं विशुद्धिरित्युच्यते ॥

लोकोत्तरो मार्गः कतमः। भावनामार्गे दुःखसमुदयनिरोधमार्गज्ञानानि धर्मज्ञानान्वयज्ञानपक्ष्याणि, तैश्च संप्रयुक्तः समाधिः, प्रथमं वा ध्यानं, यावदाकिञ्चन्यायतनम्। नैवसंज्ञानासंज्ञायतनं लौकिकमेवाऽपरिस्फुटं, संज्ञाप्रचारतामुपादाय। ततश्चाऽनिमित्तमित्युच्यते। यथोक्तं भगवता—यावदेव संज्ञासमापत्तिः, तावदा[ ज्ञा ]प्रतिवेध इति। निरोधसमापत्तिर्लोकोत्तरा, मनुष्येष्वभिनिर्ह्रियते। मनुष्याभिनिर्हृता मनुष्येषु रूपधातौ वा संमुखीक्रियते। आरूप्येष्वस्याः संमुखीभावो नाऽस्ति, शान्तविमोक्षविपाकविहारिणां तद्यत्नानारम्भतामुपादाय ॥

मृदुर्मार्गः कतमः। मृदुमृदुः, मृदुमध्यः, मृद्वधिमात्रश्च, येन त्रैधातुकावचराणां क्लेशानां भूमौ भूमावधिमात्राधिमात्रं, अधिमात्रमध्यं, अधिमात्रमृदुं क्लेशप्रकारं प्रज-(fol. 31a) हाति ॥

मध्यो मार्गः कतमः। मध्यमृदुः, मध्यमध्यः, मध्याधिमात्रश्च, येन त्रैधातुकावचराणां क्लेशानां भूमौ भूमौ मध्याधिमात्रं, मध्यमध्यं, मध्यमृदुं क्लेशप्रकारं प्रजहाति ॥

अधिमात्रो मार्गः कतमः। अधिमात्रमृदुः, अधिमात्रमध्यः, अधिमात्राधिमात्रश्च, येन त्रैधातुकावचराणां क्लेशानां भूमौ भूमौ मृद्वधिमात्रं, मृदुमध्यं, मृदुमृदुं क्लेशप्रकारं प्रजहाति ॥

प्रयोगमार्गः कतमः। येन क्लेशं प्रजहाति ॥

आनन्तर्यमार्गः कतमः। यस्याऽनन्तरं निरन्तरः क्लेशः प्रहीणो भवति ॥

विमुक्तिमार्गः कतमः। येन प्रहीणे क्लेशे विमुक्तिं साक्षात्करोति ॥

विशेषमार्गः कतमः। तदन्यस्य क्लेशप्रकारस्य प्रयोगानन्तर्यविमुक्तिमार्गः विशेषमार्गः ॥ अपि खलु क्लेशप्रहाणप्रयोगं निराकृत्य, धर्मचिन्तायां वा प्रयुक्तस्य, धर्मविहारे वा, समापत्तिविशेषे वा यो मार्गः। अपि खलु वैशेषिकान्गुणानभिनिर्हरतो वा यो [ विहार ]मार्गः ॥

मार्गभावना कतमा। प्रतिलम्भभावना, निषेवणभावना, निर्धावनभावना, प्रतिपक्षभावना च ॥ प्रतिलम्भभावना कतमा, अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय या भावना। निषेवणभावना कतमा, उत्पन्नानां कुशलानां धर्माणां स्थितयेऽसंमोषाय भूयोभावाय वृद्धिविपुलतायै या भावना। निर्धावनभावना कतमा, उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय या भावना। प्रतिपक्षभावना कतमा, अनुत्पन्नानां पापकानामकुशलानां धर्माणामनुत्पादाय या भावना ॥ अपि खलु मार्ग उत्पद्यमानः स्वां वासनामवस्थापयति सा प्रतिलम्भभावना। स एव संमुखीभूतो भावनां गच्छति सा निषेवणभावना। स्वमावरणं विजहाति सा निर्धावनभावना। विहीनञ्चावरणमायत्यामनुत्पत्तिधर्मतायामवस्थापयति सा प्रतिपक्षभावना। अपि खलु चतुर्विधः प्रतिपक्षः— विदूषणाप्रतिपक्षः, प्रहाणप्रतिपक्षः, आधारप्रतिपक्षः, दूरीभावप्रतिपक्षश्च प्रतिपक्षभावनेत्युच्यते। विदूषणा-

प्रतिपक्षः कतमः, सास्रवेषु संस्कारेष्वादीनवदर्शनम् । प्रहाणप्रतिपक्षः कतमः, प्रयोगानन्तर्यमार्गः । आधारप्रतिपक्षः कतमः, विमुक्तिमार्गः । दूरीभावप्रतिपक्षः कतमः, तदु-(fol. 31b) परिमो मार्गः ॥

अपि खलु वस्तुपरीक्षामार्गः, व्यावसायिको मार्गः, समाधिपरिकर्ममार्गः, अभिसमयप्रायोगिको मार्गः, अभिसमयमार्गः, विशुद्धिनैर्याणिको मार्गः, निश्रयेन्द्रियभिन्नो मार्गः, शिक्षात्रयपरिशोधनो मार्गः, सर्वगुणनिर्हारको मार्गः, मार्गसंग्रहमार्गश्च मार्ग इत्युच्यते ॥ स पुनरेष यथाक्रमं सप्तत्रिंशद्बोधिपक्षा धर्माः, चतस्रः प्रतिपदः, चत्वारि धर्मपदानि, शमथ-विपश्यना, त्रीणि चेन्द्रियाणि ॥ स्मृत्युपस्थानानामालम्बनं, स्वभावः, सहायः, भावना, भावनाफलञ्च वेदितव्यम् । यथा स्मृत्युपस्थानानामेवमवशिष्टानां बोधिपक्षाणाम् ॥ स्मृत्युपस्थानानामालम्बनं कतमत्, कायो, वेदना, चित्तं, धर्माः । अपि खल्वात्माश्रयवस्तु, आत्मोपभोगवस्तु, आत्मवस्तु, आत्मसंक्लेशव्यवदानवस्तु च । स्वभावः कतमः, प्रज्ञा स्मृतिश्च । सहायः कतमः, तत्संप्रयुक्ताश्चित्तचैतसिका धर्माः । भावना कतमा, अध्यात्मं-कायादिषु कायाद्यनुपश्यना, यथाऽध्यात्ममेवं बहिर्धा, अध्यात्मबहिर्धा । अध्यात्मंकायः कतमः, यान्यस्मिन्काये आध्यात्मिकानि रूपीण्यायतनानि । बहिर्धाकायः कतमः, बहिर्धारूपीण्यायतनानि । अध्यात्मबहिर्धाकायः कतमः, आध्यात्मिकायतनसंबद्धानि बाह्यान्यायतनानीन्द्रियाधिष्ठानानि, पारसांतानिकानि चाध्यात्मिकानि रूपीण्यायतनानि । काये कायानुपश्यना कतमा, या विकल्पप्रतिबिम्बकायेन प्रकृतिबिम्बकायस्य समतापश्यना । अध्यात्मंवेदना कतमा, अध्यात्मंकायमुपादायोत्पन्ना वेदना । बहिर्धावेदना कतमा, बहिर्धाकायमुपादायोत्पन्ना वेदना । यथा वेदना, एवं चित्तं, धर्माः । यथा काये कायानुपश्यना, एवं वेदनादिषु वेदनाद्यनुपश्यना यथायोगं वेदितव्या ॥

अपि खलु भावना । छन्दः, वीर्यं, व्यायाम, उत्साहः, उ[ त्सू ]ढिः, अप्रति[ वाणि ]ः, स्मृतिः, संप्रजन्यं, अप्रमादश्च ॥ छन्दभावना, अमनसिकारोपक्लेशप्रतिपक्षेण । वीर्यभावना, कौसीद्योपक्लेशप्रतिपक्षेण । व्यायामभावना, लयौद्धत्यक्लेशप्रतिपक्षे[ ण ] ।

(*Lacuna :* Skt. 32–35 ; Tib. 105a$^{6}$–112b$^{6}$ ; Ch. 684b$^{23}$–687b$^{20}$)

F

(fol. 36a) ततश्च ग्राहकाभावं नोपलम्भं स्पृशेत्ततः ॥ इति ॥

आश्रयः कतमः, आश्रयप[ रा ]वृत्तिः । कथं धर्मेषु धर्मकुशलो भवति, बहुश्रुततामुपादाय । कथमर्थकुशलो भवति, अभिधर्मेऽभिविनये लक्षणज्ञतामुपादाय । कथं व्यञ्जनकुशलो भवति, सुनिरुक्तव्यञ्जनतामुपादाय । कथं निरुक्तिकुशलो भवति, आत्मात्मेति जनपदनिरुक्तिष्वनभिनिविश्याऽनुव्यवहारज्ञतामुपादाय । कथं पूर्वान्तापरान्तसंधिकुशलो भवति, पूर्वान्त उद्ग्रहणतामपरान्ते च निःसरणतामुपादाय ॥ कथं धर्मेषु धर्मविहारी भवति । भावनामनागम्य केवलं श्रुतचिन्ताप्रयोगेण न धर्मविहारी भवति, श्रुतचिन्तामनागम्य केवलं भावनाप्रयोगेण न धर्मविहारी भवति, उभयमागम्योभयविहारेण धर्मविहारी भवति ॥ उद्ग्रहाय स्वाध्यायदेशनाभिः श्रुतमयं द्रष्टव्यम् । समाधिप्रयोगासंतुष्टिभ्यां भावनामयं द्रष्टव्यम् । [ समाधि ]प्रयोगः सातत्य[ स ]त्कृ[ त्य ]प्रयोगेणाऽविपरीतप्रयोगेण च द्रष्टव्यः । असंतुष्टिरनास्वादितोत्तरशमथप्रयोगेण द्रष्टव्या ॥





केन कारणेन वैपुल्यं बोधिसत्त्वपारमितापिटकमुच्यते । पारमितानां संख्यानिर्देशतामुपादाय, लक्षणनिर्देशतामुपादाय, क्रमनिर्देशतामुपादाय, निरुक्तिनिर्देशतामुपादाय, भावनानिर्देशतामुपादाय, प्रभेदनिर्देशतामुपादाय, संग्रहनिर्देशतामुपादाय, विपक्षनिर्देशतामुपादाय, गुणवर्णननिर्देशतामुपादाय, अन्योन्यविनिश्चयतां चोपादाय । केन कारणेन वैपुल्यं औदार्यं गाम्भीर्यञ्च देश्यते, सर्वाकारज्ञता-उदारगम्भीरतामुपादाय । केन कारणेन वैपुल्य एकत्या सत्त्वा औदार्यगाम्भीर्यं नाऽधिमुच्यन्ते, उत्त्रसन्ति, धर्मतावियुक्ततामुपादाय, अनवरोपितकुशलमूलतामुपादाय, पापमित्रपरिग्रहतां चोपादाय । केन कारणेन वैपुल्य एकत्या सत्त्वा अधिमुच्यन्ते, माना (sic ! अधिमुच्यमाना ?) अपि न निर्यान्ति, स्वयं दृष्टिपरामर्शस्थापितया, [ यथारुतार्थाभिनिविष्टतया च ] । इदं च संधायोक्तं भगवता महाधर्मादर्शधर्मपर्याये— बोधिसत्त्वस्य यथारुतमयोनिशो धर्मान्विचिन्त्यत अष्टाविंशतिरसद्दृष्टय उत्पद्यन्ते । अष्टाविंशतिरसद्दृष्टयः कतमाः, निमित्तदृष्टिः, प्रज्ञप्त्यपवाददृष्टिः, परिकल्पापवाददृष्टिः, (fol. 36b) तत्त्वापवाददृष्टिः, परिग्रहदृष्टिः, परिणतिदृष्टिः, अनवद्यतादृष्टिः, निःसरणदृष्टिः, अवज्ञादृष्टिः, प्रकोपदृष्टिः, विपरीतदृष्टिः, प्रसवदृष्टिः, अनभ्युपगमदृष्टिः, कुसृतिदृष्टिः, सत्कारदृष्टिः, दृढमूढतादृष्टिः, मूलदृष्टिः, दृष्टावदृष्टदृष्टिः, प्रयोगनिराकरणदृष्टिः, अनैर्याणिकदृष्टिः, आवरणोपचयदृष्टिः, अपुण्यप्रसवदृष्टिः, वैफल्यदृष्टिः, निग्राह्यदृष्टिः, अभ्याख्यानदृष्टिः, अकथ्यदृष्टिः, महादृष्टिः, अभिमानदृष्टिश्च ॥

यदुक्तं वैपुल्ये— निःस्वभावाः सर्वधर्मा इति, तत्र कोऽभिसंधिः । स्वयमभावतामुपादाय, स्वेनात्मनाऽभावतामुपादाय, स्वभावे वाऽनवस्थिततामुपादाय, बालग्राहवच्चाऽलक्षणतामुपादाय । अपि खलु परिकल्पिते स्वभावे लक्षणनिःस्वभावतामुपादाय, परतन्त्रे उत्पत्तिनिःस्वभावतामुपादाय, परिनिष्पन्ने परमार्थनिःस्वभावतामुपादाय । अनुत्पन्ना अनिरुद्धा आदिशान्ता प्रकृतिपरिनिर्वृतेति कोऽभिसंधिः । यथा निःस्वभा[ वा ]स्तथाऽनुत्पन्नाः, यथाऽनुत्पन्नास्तथाऽनिरुद्धाः, यथाऽनुत्पन्नाश्चाऽनिरुद्धाश्च तथा आदिशान्ताः, यथा आदिशान्तास्तथा प्रकृतिपरिनिर्वृताः ॥

अपि खलु चत्वारोऽभिप्रायाः । यो वैपुल्ये तथागतानामभिप्रायोऽनुगन्तव्यः— समताभिप्रायः, कालान्तराभिप्रायः, अर्थान्तराभिप्रायः, पुद्गलाशयाभिप्रायश्च ॥ चत्वारोऽभिसंधयः । यो वैपुल्ये तथागतानामभिसंधिरनुगन्तव्यः— अवतारणाभिसंधिः, लक्षणाभिसंधिः, प्रतिपक्षाभिसंधिः, परिणामनाभिसंधिश्च ॥

वैपुल्ये धर्मसमाधिकुशलो बोधिसत्त्वः कथं प्रत्यवगन्तव्यः । पञ्चभिः कारणैः— प्रतिक्षणं सर्वदौष्ठुल्याश्रयं द्रावयति, नानात्वसंज्ञाविगतां च धर्मारामरतिं प्रतिलभते, अपरिच्छिन्नाकारञ्चाऽप्रमाणं धर्मावभासं संजानाति, विशुद्धभागीयानि चाऽस्याऽविकल्पितानि निमित्तानि समुदाचरन्ति, धर्मकायपरिपूरिपरिनिष्पत्तये चोत्तरादुत्तरतरं हेतुसपरिग्रहं करोति ॥

तत्र पञ्चविधायां भावनायां फलं पञ्चविधं निर्वर्तितमिति दर्शयति । पञ्चविधा भावना— संभिन्नभावना, अनिमित्तभावना, अनाभोगभावना, उत्तप्तभावना, परिवृत्तिनिभाभावना यथाक्रमम् ॥

केन कारणेन वैपुल्यधर्मा धूपमाल्यादिभिः पूज्याः, न तथा श्रावकधर्माः । सर्वसत्त्वहितसुखाधिष्ठानतामुपादाय ॥

**अभिधर्मसमुच्चये धर्मविनि[ श्चयो नाम द्वितीयो विनिश्चयः ॥ ]**

(*Lacuna :* Skt. (37) ; Tib. $114b^2$–$116b^2$ ; Ch. $688a^{27}$–$689a^9$)

G

(fol. 38a) भागीयेभ्यश्च परिहीयते, तच्च समुदाचारपरिहाणितो नो तु वासनापरिहाणितः ।। श्रद्धानुसारी पुद्गलः कतमः । संभूतसंभारो मृद्विन्द्रियः परोपदेशमनुसृत्य यः सत्याभिसमयाय प्रयुज्यते ।। धर्मानुसारी कतमः । संभूतसंभारस्तीक्ष्णेन्द्रियः स्वयमेव सत्याधिपतेयं धर्ममनुस्मृत्य यः [ सत्याभि ]समयाय प्रयुज्यते ।। शुद्धाधिमुक्तः कतमः । फलकाले श्रद्धानुसारी यः पुद्गलः ।। दृष्टिप्राप्तः कतमः । फलकाले धर्मानुसारी यः पुद्गलः ।। कायसाक्षी कतमः । शैक्षोऽष्टविमोक्षध्यायी यः पुद्गलः ।। प्रज्ञाविमुक्तः कतमः । क्षीणास्रवो, नो त्वष्टविमोक्षध्यायी यः पुद्गलः ।। उभयतो भागविमु[ क्तः कत ]मः । क्षीणास्रवोऽष्टविमोक्षध्यायी यः पुद्गलः ।।

स्रोतापत्तिफलप्रतिपन्नकः कतमः । निर्वेधभागीयेषु पञ्चदशेषु दर्शनमार्गचित्तक्षणेषु यः पुद्गलः ।। स्रोतआपन्नः कतमः । षोडशे दर्शनमार्गचित्तक्षणे यः पुद्गलः । दर्शनमार्गसम्यक्त्वनियामावक्रान्तिः, धर्माभि[ समयो ]ऽपि सः । कामेभ्योऽवीतरागः पुद्गलः सम्यक्त्वनियाममवक्रामन् स्रोतआपन्नो भवति । यद्भूयो वीतरागः सम्यक्त्वनियाममवक्रामन् सकृदागामी भवति । कामेभ्यो वीतरागः सम्यक्त्वनियाममवक्रामन्ननागामी भवति ।। यदा दर्शनप्रहातव्यानां क्लेशानां प्रहाणात् [ स्रोतआ ]पन्नो भवति, केन कारणेन त्रयाणां संयोजनानां प्रहाणात्स्रोतआपन्नो भवति । प्रधानसंग्रहो भवति । प्राधान्यं किमुपादाय, अनुच्चलनकारणतामुपादाय, उच्चलितस्य मिथ्यानिर्याणकारणतामुपादाय, सम्यगनिर्याणतां चोपादाय । अपि खलु ज्ञेयविप्र[ तिपत्ति ]कारणतां चोपादाय, दृष्टिविप्रतिपत्तिकारणतां चोपादाय, प्रतिपक्षविप्रतिपत्तिकारणतां चोपादाय ।। सकृदागामिफलप्रतिपन्नकः कतमः । भावनामार्गे कामावचरस्य षष्ठस्य क्लेशप्रका-(fol. 38b) [ रस्य प्र ]हाणमार्गे यः पुद्गलः ।। अनागामिफलप्रतिपन्नकः कतमः । भावनामार्गे कामावचराणां सप्तमाष्टमानां क्लेशप्रकाराणां प्रहाणमार्गे यः पुद्गलः ।। अनागामी पुद्गलः कतमः । भावनामार्गे कामावचरस्य नवमस्य क्लेशप्रकारस्य प्रहाणमार्गे यः पुद्गलः ।। यदा सर्वेषां कामावचरा[ णां भाव ]नाप्रहातव्यानां प्रहाणादनागामी भवति, केन कारणेन पञ्चानामवरभागीयानां संयोजनानां प्रहाणादनागामीत्यु[ च्य ]ते । प्रधानसंग्रहमुपादाय । प्राधान्यं किमुपादाय, गत्यवरकारणतां धात्ववरकारणतां चोपादाय ।। अर्हत्फलप्रतिपन्नकः कतमः । भावाग्रियावद्भावाग्रिकानामष्टप्रकाराणां [ क्लेश ]प्रहाणमार्गे यः पुद्गलः ।। अर्हत्वं कतमत् । भावाग्रिकस्य नवमस्य क्लेशप्रकारस्य प्रहाणमार्गे यः पुद्गलः ।। यदा त्रैधातुकावचराणां सर्वक्लेशानां प्रहाणादर्हन्भवति, केन कारणेनोर्ध्वभागीयानां प्रहाणादर्हन्नित्युच्यते । प्रधानसंग्रहमुपादाय । प्रधानसंग्रहः कि[ मुपादा ]य, ऊर्ध्वोपादानकारणतामुपादाय, ऊर्ध्वापरित्यागकारणतां चोपादाय ।।

सप्तकृद्भवः पुद्गलः कतमः । स्रोतआपन्न एव पुद्गलः सप्तकृत्वोऽपि मिश्रामिश्रं देवमनुष्येषु भवान्संसृत्य यो दुःखस्याऽन्तमनुप्राप्नोति ।। कुलंकुलः कतमः । देवेषु वा कुलात्कुलं गत्वा [ मनुष्ये ]षु वा यो दुःखान्तमनुप्राप्नोति ।। एकवीचिकः । सकृदागामी देवेष्वेव यो दुःखस्याऽन्तमनुप्राप्नोति ।। अन्तरापरिनिर्वायी कतमः । उपपत्तिसंयोजने प्रहीणेऽभिनिर्वृत्तिसंयोजनेऽप्रहीणेऽन्तराभवमभिनिर्वर्तयन्नेव यो मार्गं संमुखीकृत्य दुःखस्याऽन्तमनु[ प्रा ]प्नोति, अभिनिर्वृत्तो वाऽन्तराभवे



उपपत्तिभवगमनाय चेतयन्नेव यो मार्गं संमुखीकृत्य दुःखस्याऽन्तमनुप्राप्नोति, अभिसंचेतयित्वा वा उपपत्तिभवमभिसंप्रस्थितो[ ऽनागम्यो ]पपत्तिभवं यो मार्गं संमुखीकृत्य दुःखस्याऽन्तमनुप्राप्नोति ।। अनभिसंस्कारपरिनिर्वायी कतमः । उपपन्नोऽनभिसं[स्कारो यो मार्गं संमुखीकृत्य दुःखस्याऽन्तमनुप्राप्नोति ।।

(*Lacuna :* Skt. (39–41) ; Tib. $118a^4$–$124a^4$ ; Chin. $689c^3$–$692a^3$)

H

(fol. 42a) [ चत्वार्यप्रमाणा ]न्येवं पञ्चाभिज्ञाः, परिशेषान् गुणान् प्रान्तकोटिकं चतुर्थं ध्यानं निश्रित्य श्रावको बोधिसत्त्वस्तथागतो वाऽभिनिर्हरति । तत्पुनः किमुपादाय, ध्यानसंनिश्रयेण यथाव्यवस्थानमनसिकारबहुलीकारतामुपादाय । त एते गुणा द्विविधाः, स्वकारित्रप्रत्युपस्थानाश्च वैहारिकाश्च । ये स्वकारित्रप्रत्युपस्थानास्ते लोकोत्तरपृष्ठलब्धाः संवृतिज्ञानस्वभावा द्रष्टव्याः । ये पुनर्वैहारिकास्ते लोकोत्तरज्ञानस्वभावा द्रष्टव्याः ।।

अप्रमाणैः किं कर्म करोति । विपक्षं जहाति, अनुकम्पाविहारितया पुण्यसंभारं परिपूरयति सत्त्वपरिपाके च न परिखिद्यते ।।

विमोक्षैः किं कर्म करोति । निर्माणकर्माऽभिनिर्हरति, शुभनिर्माणे न संक्लिश्यते, शान्तेषु विमोक्षेषु न सज्जति, परमप्रशान्तेन चार्यविहारेण विहरत्यधिमुच्यनतामुपादाय ।।

अभिभ्वायतनैः किं कर्म करोति । त्रयाणां विमोक्षाणामालम्बनं वशे वर्तयति, आलम्बनाभिभवनतामुपादाय ।।

कृत्स्नायतनैः किं कर्म करोति । विमोक्षालम्बनं परिनिष्पादयति, कृत्स्नस्फारणतामुपादाय ।।

अरणया किं कर्म करोति । आदेयवचनो भवति ।।

प्रणिधिज्ञानेन किं कर्म करोति । भूतभव्यवर्तमानं व्याकरोति, बहुमतश्च भवति लोकस्य ।।

प्रतिसंविद्भिः किं कर्म करोति । देशनया सत्त्वचित्तानि संतोषयति ।।

अभिज्ञाभिः किं कर्म करोति । शासने कायकर्मणा आवर्जयति, वाक्कर्मणा, चित्तादेशनया आवर्जयति । सत्त्वचरितं च ज्ञात्वा आगतिञ्च गतिञ्च, निःसरणे सत्त्वान् यथावदववदते ।।

लक्षणानुव्यञ्जनैः किं कर्म करोति । दर्शनमात्रकेण महापुरुषत्वे संप्रत्ययं जनयति, चित्तान्यभिप्रसादयति ।।

परिशुद्धिभिः किं कर्म करोति । संचिन्त्य भवोपपत्तिं परिगृह्णाति, आकांक्षयन् कल्पं वा कल्पावशेषं वा तिष्ठति, आयुःसंस्कारान् वा उत्सृजति, धर्मवशवर्ती भवति, समाधिवशवर्ती, सद्धर्मञ्च संधारयति ।।

बलैः किं कर्म करोति । अहेतुविषमहेतुवादं प्रत्याख्यायाऽकृताभ्यागम-(fol. 42b) वादं च, सम्यगभ्युदयमार्गं देशयति । सत्त्वचित्तचरितानि चाऽनुप्रविश्य देशनाभाजनतां चाऽशयं चानुशयं चालम्बनं च संभारं च भव्यतां च निःसरणं च यथावन्निःश्रेयसमार्गं देशयति । सर्वमारांश्च निगृह्णाति । सर्वत्र च प्रश्नं पृच्छति, पृष्टो व्याकरोति ।।

वैशारद्यैः किं कर्म करोति। पर्षदि सम्यगात्मनः शास्तृत्वं व्यवस्थापयति, चोदकांश्चाऽन्यतीर्थ्यान्निगृह्णाति ॥

स्मृत्युपस्थानैः किं कर्म करोति। असंक्लिष्टो गणं परिकर्षति ॥

अरक्षैः किं कर्म करोति। निरन्तरं गणमववदते, समनुशास्ति ॥

असंमोषधर्मतया किं करोति। बुद्धकृत्यं न हापयति ॥

वासनासमुद्घातेन किं कर्म करोति। निःक्लेशः क्लेशप्रतिरूपां चेष्टां न दर्शयति ॥

महाकरुणया किं कर्म करोति। षट्कृत्वो रात्रिंदिवसेनालोकं व्यवलोकयति ॥

आवेणिकैर्बुद्धधर्मैः किं कर्म करोति। सर्वश्रावकप्रत्येकबुद्धान् कायवाङ्मनस्कर्मपरिशुद्ध्या, प्राप्त्या, आचारेण, विहारेण चाऽभिभवति ॥

सर्वाकारज्ञतया किं कर्म करोति। सर्वसत्त्वानां सर्वसंशयान् छिनत्ति, धर्मनेत्रीं च दीर्घकालमवस्थापयति, येना[ ऽप ]रिपक्ताः सत्त्वाः परिपच्य[ न्ते परि ]पक्ताश्च विमुच्यन्ते ॥

एष्वभिसमयेषूत्तरोत्तरं विशिष्टं मार्गं लभमानः पूर्वकं हीनं मार्गं विजहाति, संकलनप्रहाणं च साक्षात्करोति। निरुपधिशेषे निर्वाणधातौ श्रावकः सर्वमार्गं समवसर्गविहान्या विजहाति। नो तु बोधिसत्त्वः। अत एव बोधिसत्त्वा अक्षयकुशलमूला अक्षयगुणा इत्युच्यन्ते ॥

यान्यव्याकृतवस्तूनि व्यवस्थापितानि, किमुपादाय। अयोनिशः परिप्रश्नतामुपादाय ॥ [ अयोनिशः परिप्रश्नता किमुपादाय। ] हेतुफलसंक्लेशव्यवदानचिन्तापरिवर्जनतामुपादाय ॥

केन कारणेन बोधिसत्त्वो बोधिसत्त्वन्यासावक्रान्तः स्रोतापन्नो न भवति। स्रोतःप्रतिपत्त्यपरिनिष्पन्नतामुपादाय ॥ केन कारणेन सकृदागामी न भवति। अप्रमाणसंचिन्त्यभवोपपत्तिपरिग्रहतामुपादाय ॥ केन कारणेनाऽनागामी न भवति। ध्याने विहृत्य कामधातावुपपद्यनतामुपादाय ॥

बोधिसत्त्वाः सत्यान्यभि——

(*Lacuna :* Skt. 43–(45) ; Tib. $125b^{6}$–$129b^{5}$ ; Ch. $692c^{5}$–$694b^{10}$)

## AN ACKNOWLEDGMENT

This article ' Fragments from the Abhidharmasamuccaya of Asaṃga ' in the present volume of the Journal and ' The Text of the Abhidharmakośakārikā of Vasubandhu ' published in the last volume are mainly based on Tibetan MSS. The negatives of the MSS were obtained on loan through the kind courtesy of the Bihar Research Society. We are very sorry for the omission of the acknowledgement of the debt due to the Bihar Research Society, which omission we a.e now glad to correct.

**Editors**

# EARLY BRAHMINS AND BRAHMINISM

By D. D. Kosambi

In the preceding issue of this journal, I sketched certain hypotheses about the early caste system. We shall now consider, from sources not used in that note, supplementary evidence dealing particularly with the Brahmins.

**1.** In explaining *nañ* compounds of negation (Pāṇ. 2.2.6) Patañjali says: "Now all these words apply to a collective of qualities (such as) Brāhmaṇa, Kṣatriya, Vaiśya, Śūdra. Asceticism, (knowledge of the) scriptures, and birth—this is the making of a Brāhmaṇa. One without asceticism and scriptures is merely Brāhmaṇa-born. Thus, fair skin, cleanliness of habit, brown (eyes), tawny hair—these are the intrinsic qualities that make Brāhmaṇahood. Words applied to the collective apply also to members. Thus—the Pāñcālas towards the east; oil consumed; ghee consumed; white, blue, dark, black, etc. Similarly, the word Brāhmaṇa derived from the collective applies to members without birth or without the qualities. Without the qualities as for instance '*abrāhmaṇa* is he who urinates standing, *abrāhmaṇa* is he who eats standing'. The word Brāhmaṇa is applied without birth either by uncertainty or misdirection. By uncertainty thus—having seen (a person) fair-skinned, clean-behaved, brown (eyed), tawny haired one concludes 'this is a Brāhmaṇa'; then he ascertains that it isn't a Brāhmaṇa, '*abrāhmaṇa* is he'. There the word Brāhmaṇa is applied by uncertainty and the meaning is negated by birth. By misdirection: misdirection is his (who is told) 'in such a place is a Brāhmaṇa, bring him here'. He, having gone there, concludes of whom he sees 'that is a Brāhmaṇa'. And thereafter he ascertains that it isn't a Brāhmaṇa, '*abrāhmaṇa* is he'. There the word Brāhmaṇa is applied by misdirection, and the meaning negated by birth. (The prefix) *a*-(comes) therefore from doubt or misdirection. When one has seen a certain black (person), the colour of a heap of black beans, seated in the marketplace, one definitely concludes that that is not a Brāhmaṇa; one is convinced thereof."

On this quotation, one may note in passing that the modern commentator Nāgojibhaṭṭa has lived up to the traditions of his calling by a fantastic explanation, that *gaurī* is a girl given away in marriage in her eighth year, *gaura* therefore her son. This would avoid all embarrassing comment upon dark-skinned Brahmins.

Patañjali was fully acquainted with local and temporal variations. *Purākalpa* = in olden times, marks many such changes. On Pāṇ. 1.2.64, "the *kārṣāpaṇa* was in days of old of sixteen *māṣas*". So in his preamble—"In olden days it was thus. After initiation the Brāhmaṇas studied grammar; after teaching them pronunciation, accent, intonation were vedic words taught. Such is not the case today. Having learned the Veda, they immediately become orators. 'We have learned vedic words from the Veda, and those in common use are quite clear by usage; grammar serves no purpose'." Some observances he mentions are no longer the fashion. "The sacrificers say, the son is to be named after the tenth day. The name should begin with a soft consonant; in the middle should occur *y*, *r*, *l*, or *v*; the first vowel should not be *ā*, *ai*, *au*. The name should be taken from the father's three immediate paternal ancestors; it should be applicable to the disembodied, and not of an enemy; of two or four letters, with a *kṛt* not a *taddhita* ending." This custom might explain the multiple names we find for some kings; it does not seem to apply to names in common use even in Patañjali's day, while the modern name-day is the twelfth after birth. Patañjali takes words to be eternal: "Thus one wishing to do

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer